॥ श्रीः ॥ 2·4

॥ चतुर्मतसामरस्यम् ॥

CHATURMATA SĀMARASYAM

पोलहम् सु. श्रीरामशास्त्रि

॥ श्रीः ॥

॥ श्रीमच्छङ्करभगवत्पादेभ्यो नमः ॥

॥ चतुर्मतसामरस्यम् ॥

शास्त्ररत्नाकर-पोलहम्-सु. श्रीरामशास्त्रिणा प्रणीतम्

श्रीजगद्गुरु काञ्चीकामकोटि पीठाधिपतीनां श्रीमुखोद्भासितम्

गोश्रीमहाराजानां दर्शनकलानिधीनां परीक्षिदपराभिधानश्रीयुतरामवर्मणां
धर्मरक्षामणि-के-वालसुब्रह्मण्यार्याणां च
अभिनन्दनसमुज्ज्वलम् ।

ग्रन्थप्रकाशस्थानम्

कामकोटि कोशस्थानम्

फरान्सिस् जोसफ् स्ट्रीट्, मद्रास्—१.

1957 [मूल्यम् रू. 1

SRI

CHATURMATA SĀMARASYAM

BY

Śāstraratnākara Polaham Sri RĀMA SASTRI

with a Srimukham from

His Holiness Sri Jagadguru Sri Śankarāchārya Swamigal
of Kanchi Kamakoṭi Peeṭham

AND

with a Foreword by

K. BALASUBRAHMANYA AIYAR, B.A., B.L., M.L.C.

AND

with an appreciation by

His Highness PARIKSHIT RAMAVARMA
Maharaja of Cochin

SRI KAMAKOTI KOSASTHAN
4, Francis Joseph Street, Madras 1.

1957 [Price Re. 1



श्रीमत्परमहंसपरिव्राजकाचार्यवर्य
श्रीजगद्गुरु कांची श्रीकामकोटिपीठाधिपाः
श्रीचन्द्रशेखरेन्द्रसरस्वती संयमीन्द्राः

॥ श्रीः ॥

॥ श्रीमुखम् ॥

मुद्रा

श्रीमत्परमहंस परिव्राजकाचार्यवर्य
श्रीमच्छंकरभगवत्पाद प्रतिष्ठित
श्रीकाञ्ची कामकोटिपीठाधिप जगद्गुरु
श्रीमच्चन्द्रशेखरेन्द्रसरस्वती श्रीपादैः

पोलकग्रामाभिजनशास्त्ररत्नाकरश्रीरामशास्त्रिविषये क्रियते नारायणस्मृतिः । भवद्भिः विरचितं चतुर्मतसामरस्यनामकं ग्रन्थरत्नमस्माभिरवालोकि ।

अयं ग्रन्थतल्लजः शैववैष्णवविशिष्टाद्वैतद्वैतमतानामनादिकालसिद्धेन श्री भगवत्पादपोषितेनाद्वैतसिद्धान्तेनाविरोधम्, अधिकार्यादिभेदेन परस्पर-सामरस्यं च श्रीमदप्पय्यदीक्षितविरचितचतुर्मतसारसंग्रहतात्पर्यवर्णनमुखेन विशदयन्, भवतां कूलङ्कषं तत्तद्दर्शनविमर्शनवैदग्धीम्, अनितरसाधारणीं विषयोपपादनशैलीं च प्रकटयन् ग्रन्थनिरीक्षकाणाममन्दमानन्दं जनयति ।

आस्तिकाः एतद्ग्रन्थपरिशीलकाः सकलकल्याणगुणविशिष्टपरदेवताप्रसादद्वारा परमं श्रेयः प्राप्नुवन्त्वित्याशास्महे ।

विजययात्रास्थानम्
श्रीकाञ्चीक्षेत्रम्
दुर्मुखमार्गशीर्षशुद्धदशमी }

नारायणस्मृतिः

॥ श्रीः ॥

THE MAHARAJA
OF
COCHIN.

Hill Palace
TRIPUNITURA
30-12-'56.

मुद्रा

श्रीभगवत्पादभक्तशिरोमणिभिः पोलकं—सु. श्रीरामशास्त्रिभिः निबद्धं चतुर्मतसामरस्यं श्रीमन्मध्वरामानुजादीनां चतुर्णामाचार्यवर्याणां कुत्र कुत्र विषये मिथो वैमत्यं, कुत्र कुत्र चैकमत्यमिति विविच्य ज्ञातुकामानामत्यन्तमुपकरोतीत्यत्र न वैमत्यलेशस्याप्यवकाशः।

अत्र प्रतिपाद्यानां विषयाणां सन्निवेशस्य क्रमे, प्रतिपादनस्य वैशद्ये च ग्रन्थकृद्भिः महदवधानं विहितमिति परमिदमामोदस्थानम्।

द्वैतविशिष्टाद्वैतादिषु गहनेषु नयेषु शास्त्रिमहाशयानामसाधारणं प्रावीण्यं प्रकाशयन्नयं ग्रन्थः तेषां शास्त्ररत्नाकराभिधाया अन्वर्थतां सुतरां प्रख्यापयति। प्राचीनेषु नवीनेषु च निरवधिकनिबन्धनेषु सर्वङ्कषः शास्त्रिमहाभागानां परिचयः कस्य वा न कुर्यादाश्चर्यम्। ईदृशं शास्त्रपाण्डित्यं ग्रन्थपरिचयश्च येन तैस्समासादि, तत्तेषां परिश्रमस्थैर्यं मुक्तकण्ठं श्लाघामर्हत्येव।

भूयोपि रत्नाकरादस्मादुदयं प्रपद्यन्तामीदृशान्यनर्घाणि ग्रन्थरत्नानीति प्रकाममभिलषन्नस्य भूयान् प्रचारो भूयादिति सर्वेश्वरं प्रार्थयते विदुषां विधेयः—

रामवर्मा
परीक्षित्।

इदमवधेयम्

निगमागमरूपोभयवेदान्तप्रवीणेन श्रीपतिपण्डितेन्द्रयतिना वीरशैव-मतानुसारिणा विरचिते 'अगस्त्यमुनिचन्द्रेण कृतां वैयासिकीं शुभाम् । सूत्रवृत्तिं समालोक्य कृतं भाष्यं शिवङ्करम् ॥' इत्युपक्रान्ते श्रीकरभाष्याभिधे ब्रह्मसूत्रभाष्ये अन्तस्तद्धर्माधिकरणे, पाञ्चरात्राधिकरणे, इतरव्यपदेशाधिकरणे च, श्रीकण्ठभाष्यवचनान्यनूदितानि । तत्र श्रीकण्ठाचार्यः नीलकण्ठाचार्य इति नामद्वयं श्रीकण्ठाचार्यस्य व्यवहृतम् । एवं च चतुर्मतसामरस्यग्रन्थे 45-46 पुटयोः उक्तरीत्या क्रियासारग्रन्थकृता प्राचीनत्वेन व्यवहृतं नीलकण्ठभाष्यं श्रीकण्ठभाष्यमेवेत्यत्र न संशयलेशस्याप्यवसरः । तथा च नीलकण्ठश्रीकण्ठयोः क्रियासारग्रन्थभूमिकाकृदुक्तः भेदः न प्रामाणिक इति सहृदया विदाङ्कुर्वन्तु । श्रीपतिप्रभृतयो वीरशैवाः अगस्त्यमहर्षिकृतां, रामानुजप्रभृतयो वीरवैष्णवाः बोधायनमहर्षिकृतां च ब्रह्मसूत्रवृत्तिं स्वीयमतोपष्टंभकतया प्रदर्शयन्ति । इत्यावेदये—

पोलहम्-सु. श्रीरामशास्त्री.

FOREWORD

This book was originally published under the auspices of the Advaita Sabha, Kumbakonam in 1944 by Pandit Polaham Sri Rama Sastrigal who is a very erudite scholar and who was then Professor of Vedanta in a Samskrit Institution established by His Holiness Jagadguru Sri Sankaracharya of Kanchi Kamakoti Peetam at Jambukeswaram and who is now Professor of Vedanta in the Madras Samskrit College, Mylapore. He has re-published this book with corrections and modifications.

It is now published together with another important research work which the Pandit has done about the two great pre-Sankara Advaitins, Dravidāchārya and Bṛhmanandi. With great erudition and research after looking into various books on the subject Pandit Polaham Sri Rama Sastrigal has endeavoured to prove that these two great scholars and religious teachers, Dravidāchārya and Bṛhmanandi were really exponents of Advaita system of philosophy.

As I have already mentioned in the Introduction which I worte the 7th March 1944, to the first edition of this book, the Pandit has pointed out the many common points between the four schools of Philosophy, namely, Advaita, Sivadvaita, Visishtadvaita, and Dwaita. Following the way pointed out by the famous Appayya Dikshitar, he has also shown how these schools all lead step by step to the same goal, Moksha. Though there has been the precedent of a work called 'Chaturmatasārasaṅgraha' by the famous Appaiya Dikshithar, the general trend hitherto of the writings of latter-day scholars has been to expound the differences between the four schools of Indian Philosophy and to criticise one or other of them according to the mental allegiance of the author, to one or other of the schools. In that way emphasis has been laid more upon the differences among these schools than upon their fundamental unities. The Vedanta Dars'ana, as a single school, is different from the other well-known darsanas of Indian Philosophy, namely, the Sānkhya, the Yoga, the Tārkika

and the Mimāmsa. It also differs fundamentally from the Buddhist, Jain and other Philosophies. The four schools of Indian Philosophy dealt with in this book, are only sub-divisions of the Vedānta Darśana. This fundamental fact is often lost sight of amidst the thicket of polemical literature in this subject. Pandit Rama Sastri has in this book with his terse and powerful Samskrit style, clearly expounded the fundamental principles of the four schools and has rightly fixed the place of each school in the ladder to Moksha. It will, I am sure, be of great profit to the students of Indian Philosophy especially of the Vedanta Darsana and will conduce to the clearing of may misunderstandings and prejudices among the votaries of these four schools. The Advaita Sabha is grateful to Pandit Rama Sastri for this valuable work.

All students of Indian Philosophy will be grateful to Pandit Sri Rama Sastrigal for his valuable work which gives the student a succint idea of the important teachings of the four systems of philosophy and at the same time also gives an exposition on the common points of the four systems. There is an Introduction written by this eminent pandit which has been translated into English by Sri P. Sankaranarayanan, M.A., Professor of Philosophy, Vivekananda College, Madras. We are also very grateful to him for the translation which he has given.

"Ashrama"
Luz, Mylapore
20th December 1956

K. BALASUBRAMANIA IYER.

INTRODUCTION

(1) There are four well-known systems of philosophy, namely Advaita, Viśiṣṭādvaita, Śivādvaita and Dvaita. They are associated respectively, with the adored names of S'ri S'ankara Bhagavatpāda, Sri Srikanṭhāchārya, Sri Rāmāunjāchārya and Srī Madhwāchārya. Sri Bhagavatpāda expounded the philosophy of *Advaita* which is chronologically the earliest of these philosophies through his Brahmasūtra Bhaṣya. That philosophy which is in accord with the teachings of the Upaniṣads, instructs in the knowledge of Brahman which is non-different from the Ātman. Such knowledge which implies the sense of the unreality of the world and is the means to mokṣa through the knowledge that Brahman is non-different from the Ātman can be acquired only by those who have the four-fold qualification.

(2) But, all are not qualified for this pursuit of the knowledge of non-qualified Brahman. It requires a concentration of mind which will bring about direct intuition by constant meditation on it. For those who cannot so concentrate, Śri Śrikanṭhāchārya who came next taught through his commentary on the Brahma Sūtras the philosophy of *Śivādvaita*. In it, he has detailed the way of upāsana of the non-differentiated Saguṇa Brahman that is of the nature of S'iva qualified by S'akti and which will give the power to meditate with concentration on what is non-qualified.

(3) Then appeared Śri Rāmānujachārya who propounded through his Brahmaśūtra Bhāṣya the philosophy of *Viśisṣṭādvaita*. That is intended for those who do not have the qualification for even the *Saguṇabrahma abhedopāsana* method taught by Srikanṭhāchārya. To help them to acquire that qualification, S'ri Rāmānujāchārya taught the way of reflecting on the relation between the jīva and Brahman after the manner of the *S'arīra* and the *Śarīri* in organic inseparability, as the 'owned' and the 'owner'. This is the *dāsamārga* taught in the purāṇās and the itihāsās and speaks of Vishnu as the Highest.

(4) After that came Sri Madhwāchārya. For those who cannot meditate in the manner of *Śarīra Śarīrī* relation of organic inseparability, to help them to acquire that qualification, he taught the philosophy of *Dvaita* in his Brahmasūtra Bhāṣya establishing separateness between 'Jīva and Brahman, with the consciousness of the 'owned' and the 'owner', but without the sense of the *Śarīra Śarīri* relationship. According to Sri Madhwāchārya too Vishnu is the Highest.

(5) Thus the expounders of the four schools provided, out of the abundance of their grace for aspirants of diverse qualifications and each later Āchārya showed a way which can be pursued by persons who were not able to come up to the requirements of the philosophy of his predecessor.

(6) This gradation is analogous to that detailed in the twelfth chapter of the Bhagavad Gita in which the Bhagavān addresses those who are unequal to the acquisition of nirviśeṣa Brahmavidya which involves supreme effort and says: 'Concentrate your mind in Me ; establish your intellect in Me' and, for those lower down in the scale of qualification, He prescribes in a descending order, three other means, namely worship of an external image, if that is not possible, observance of holy duties and if that too is not possible, the renunciation of the fruits of all actions :

"If thou art not able to fix thy mind on Me, Dhananjaya, then seek to reach Me by the practice of concentration. XII-9.

"If thou art not able to practice even concentration of mind, then devote thyself to My service. XII-10

"If thou art not able to do even this, then give up the fruit of all actions, 'seeking refuge in devotion to Me with thy mind subdued." XII-11.

(7) By this instruction, the Lord indicates that the observance of the later prescriptions will qualify for the higher means. The prescription of a lower method for those who are incapable of practising the higher does not mean that the lower method will *by itself directly* lead to ultimate realisation. Even so, here too,

the philosophies of Dvaita etc., are intended to dower those who practise them with the requisite qualification for the pursuit of the methods prescribed in anterior philosophies.

(8) The teaching in the works of the several other Āchāryās that it is possible to realise the Absolute through the practice of the methods detailed in Dvaita and other philosophies is intended only to create faith and earnestness in the minds of aspirants not qualified for the higher levels. For example, the Lord says in the Gita: "Jñāna is superior to abhyāsa; dhyāna is superior to jñāna; superior to dhyāna is renunciation of works; śānti follows immediately upon renunciation". The declaration that peace is attained by mere renunciation is intended only to extol tyāga and to enthuse people in the way of renunciation.

It is with this in mind that Śri Bhagavatpāda wrote as follows in his Gitābhāṣya:

> "That the renunciation of the fruits of all works is the means to beneficence (*Śreyas*) is taught to the ignorant one who is given to performance of Karma and who does not have the capacity to adopt the aforesaid means. *Karmaphalatyāga* is not taught in the first instance anterior to all other means. The reference with approval to renunciation of the fruits of all works in the succeeding order of superiority in the context of *Śreyohi jñānam-abhyāsāt* is thus to be interpreted. It is recommended for adoption only where there is incapacity to adopt the other means. By the words *yadā sarve pramuchyante*, it is taught that immortality (*amṛtatva*) ensues upon the abandonment of all desires (*Sarvakāmaprahāṇa*) This is well-known. Desires are for the fruits of all actions. Upon their abandonment, it is said, the wise man who is steadfast in dhyāna attains peace and that for the ignorant one renunciation of fruits of actions is similar to abandonment of all desires. It is from that point of view that *sarvakarmaphalatyāga* is praised in order to induce people to do it. This is like praising the modern

Brāhmanas since they too belong to the class of Brāhmanas to which Agastya who drank the ocean belonged".

(9) Advaita and other philosophies are propounded in the descending order of gradation to provide for persons of descending grades of qualification and capacity. Similarly as a person acquires higher degrees of qualification, the higher philosophies and practices prescribed in them are correspondingly set forth, That this is so is clearly brought out by Śri Appayya Dīkṣita in his *Chaturmata Sāra Sangraha* as follows:

Ānandatīrthamuni Lakshmaṇa deśikendra
Śrīkanṭhayogipadavīradavīyasīrnahā,
Ācharya pādasaraṇīm ca vivicya boddhum
Sangrhyate matacatuṣṭayasāraleśah.

He indicates the gradation of the several philosophies starting with the Dvaita of Ānandatīrtha (Sri Madhwachārya), proceeding through the Vis'iṣṭādvaitas of Lakṣmaṇadeśikendra (Sri Ramanujachārya) and Sri Srikantachārya, and culminating in the Advaita of Achāryapāda (Sri S'ankara). The clubbing together of the names of Ānandatīrtha, Lakshmaṇadeśikendra and S'rīkanṭha in the first half of the s'loka is intended to show that the three philosophies propounded by them are alike in expounding the means (at different levels) as upāsana mārgas to the last, namely Advaita which is achieved by jñāna mārga. Purposing to expound these philosophies, Sri Dīkṣita does so in the order indicated, in the sections respectively called *Nyāyamuktāvali*, *Nayamayūkhamālika*, *Nayamaṇimāla*, and *Nayamanjarī*. The manner of the gradual development of the inclination towards Advaita detailed in these sections is clearly explained in the present work.

(10) In the verse quoted, S'ri Dīkṣita speaks of the philosophies of Dvaita etc., being the means to mokṣa and of the validity of all those philosophies in the sense of different steps in a ladder and with reference to persons of varying qualifications. This is what is also stated in the *Sūtasamhita* and other works,

From this standpoint, Śri Dikṣita affirms that the view that these philosophies are contradictory to one another becomes untenable.

(11) The validity of the special differentiating features like worship of God which are found in Dvaitā and other philosophies is not affected by the canons of other philosophies. This finds support in the statement of Sri Bhagavatpada in his commentary on the Brihadāraṇyakopanishad II. i. *Na ca pramāṇam pramāṇāntareṇa viruddhyate. Pramāṇāntarāviṣayameva hi pramāṇāntaram jñāpayati.* "One canon is not contradicted by another. A different canon intimates a different subject".

(12) The gradual affliation of the three philosophies beginning with Dvaita and also their mutual reconciliation* is indicated by Śri Dikṣita in the śloka quoted above. It is after that manner that the common and special similarities of the four schools have been set forth in this work.

(13) I pray that scholars of kindred heart who peruse this book devoted to underline the agreement among the four philosophies will look at the criticisms of each philosophy by the protagonists of others bearing in mind the dictum of S'ri Diskṣita: *Virodho nātīva sphurati nahi nindānayavidām*: contradiction does not appear to those who are aware that praise of one thing does not mean decrying of another, but is intended only for creating interest in the philosophy concerned. I pray that scholars will approach their study with this attitude and contribute to the prosperity of mankind.

POLAHAM S. ŚRĪ RĀMĀ ŚĀSTRI.

---

*That Dvaita has proximate affinity to the Visiṣtādvaita and is a preparatory step to it, is clear from the following which we quote from the opening ślokas of Sri Vedānta Desika's S'atadūṣaṇī:

Prāchimupetya padavīm yatirājadṛṣṭam
tatsannikṛṣṭāmapi vā matamāśrayantah.



पोलहम्-शास्त्ररत्नाकर-सु. श्रीरामशास्त्री

ग्रन्थकारः ॥

|| श्रीः ||

चतुर्मतप्रवर्तकाचार्येभ्यो नमः

|| चतुर्मतसामरस्यभूमिका ||

---

(१) अद्वैतम्, शिवाद्वैतम्, विशिष्टाद्वैतम्, द्वैतम्, इति जगत्यां सुप्रसिद्धानि चत्वारि मतानि । श्रीभगवत्पादैः प्रथमत आविर्भूय साधनचतुष्टयसंपन्नानामधिकारिणां मोक्षसाधनीभूतनिष्प्रपञ्चप्रत्यगभिन्नब्रह्मज्ञानाय ब्रह्मसूत्रभाष्यमुखेन औपनिषदं अद्वैतमतं प्रवर्तितम् ।

(२) तदनु श्रीकण्ठाचार्यैः आविर्भूय निर्विशेषशुद्धब्रह्मभावावाप्त्यर्थतन्निदिध्यासनतत्साक्षात्कारजननसमर्थचित्तैकाग्र्यरहिताधिकारिणां कृते निर्गुणविषयकचित्तस्थैर्याधायकशक्तिविशिष्टशिवात्मकसगुणब्रह्माभेदोपासनमार्गावबोधकं शिवाद्वैतमतं ब्रह्मसूत्रभाष्यमुखेन प्रवर्तितम् ।

(३) पश्चात् रामानुजाचार्यैराविर्भूय सगुणब्रह्माभेदोपासनाधिकारपौष्कल्यरहिताधिकारिणां कृते सगुणब्रह्माभेदोपासनाधिकारसंपादकं जीवब्रह्मणोः शरीरशरीरिभावरूपापृथक्सिद्धस्वस्वामिभावोपासनात्मकपुराणेतिहासागमप्रसिद्धदासमार्गबोधकं विष्णुपारम्यपरं विशिष्टाद्वैतमतं ब्रह्मसूत्रभाष्यमुखेन प्रवर्तितम् ।

(४) ततः परं मध्वाचार्यैराविर्भूय शरीरशरीरिभावरूपापृथक्सिद्धस्वस्वामिभावोपासनाधिकारपौष्कल्यरहिताधिकारिणां कृते तादृशोपासनाधिकारसंपादकं जीवब्रह्मणोः शरीरशरीरिभावरहितपृथक्सिद्धस्वस्वामिभावोपासनामार्गावबोधकं विष्णुपारम्यपरमेव द्वैतमतं ब्रह्मसूत्रभाष्यमुखेन प्रवर्तितम् ।

(५) एतानि च मतानि पूर्वपूर्वमतोक्तार्थानुष्ठानाशक्तिमतोऽधिकारिणः प्रति क्रमेण उत्तरोत्तरं प्रवर्तितानि कारुणिकैर्महामहिमभिश्चतुर्मतप्रवर्तकाचार्यवर्यैः ।

(६) यथा हि भगवद्गीतायां द्वादशाध्याये अत्यर्थक्लेशसंपाद्यायां निर्विशेषब्रह्मविद्यायां अशक्तान् प्रति प्रथमं सगुणब्रह्मध्यानं 'मय्येव मन आधत्स्व मयि बुद्धिं निवेशय' इति विधाय, तत्राप्यशक्तानां अशक्तितारतम्येन प्रथमं प्रतिमादौ बाह्ये भगवद्ध्यानाभ्यासः, तदशक्तौ भागवतधर्मानुष्ठानम्, तदशक्तौ सर्वकर्मफलत्यागः, इति त्रीणि साधनानि,

'अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥
अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ॥
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ।'

इति विहितानि, तद्वत् ।

(७) यथा च तत्र अशक्तान् प्रति विहितोत्तरोत्तरसाधनानुष्ठानसमुपजातशक्तिमतां अधिकारिणां पूर्वपूर्वसाधनानुष्ठानक्रमेणैव श्रेयःप्राप्तिः, न तु अन्तिमसाधनानुष्ठानमात्रात् कृतकृत्यता इति भगवतोऽभिमतम्, तथैवात्रापि द्वैतादिमतोक्तसाधनानुष्ठानसमुपजातशक्तिमतामधिकारिणां पूर्वपूर्वमतोक्तार्थावलंबेनैव श्रेयःप्राप्तिरिति चतुर्मतप्रवर्तकाचार्याणामाशयस्सहृदयैरवगन्तव्यः ।

(८) तत्तद्ग्रन्थेषु द्वैतादिमतावलंबमात्रेण कृतकृत्यताभिधानमपि आचार्याणां अशक्ताधिकारिप्ररोचनायैव । यथा च गीतायां 'श्रेयो हि ज्ञानमभ्यासात् ज्ञानात् ध्यानं विशिष्यते । ध्यानात् कर्मफलत्यागः त्यागाच्छान्तिरनन्तरम् ॥' इति श्लोके सर्वकर्मफलत्यागस्य उत्तरोत्तरविशिष्टत्वोपदेशः, त्यागमात्रेण शान्तिप्राप्तिकीर्तनं च प्ररोचनायैव ।

एतदभिप्रायेणैव भगवद्गीताभाष्ये भगवत्पादैः "अज्ञस्य कर्मणि प्रवृत्तस्य पूर्वोपदिष्टोपायानुष्ठानाशक्तौ सर्वकर्मणां फलत्यागः श्रेयस्साधनमुपदिष्टम्, न प्रथममेव, अतश्च 'श्रेयो हि ज्ञानमभ्यासात्' इत्युत्तरोत्तरविशिष्टत्वोपदेशेन सर्व-

कर्मफलत्यागः स्तूयते। संपन्नसाधनानुष्ठानाशक्तौ अनुष्ठेयत्वेन श्रुतत्वात्। 'यदा सर्वे प्रमुच्यन्ते' इति सर्वकामप्रहाणादमृतत्वमुक्तम्। तत् प्रसिद्धम्। कामाश्च सर्वे श्रौतस्मार्तसर्वकर्मणां फलानि। तत्त्यागे च विदुषो ध्याननिष्ठस्य अनन्तरैव शान्तिरिति सर्वकामत्यागसामान्यं अज्ञकर्मफलत्यागस्यास्तीति तत्सामान्यात् सर्वकर्मफलत्यागस्तुतिरियं प्ररोचनार्था। यथा अगस्त्येन ब्राह्मणेन समुद्रः पीत इति इदानीन्तना अपि ब्राह्मणाः ब्राह्मणत्वसामान्यात् स्तूयन्ते" इति उक्तम्।

(९) अद्वैतादिमतानां क्रमेण अधिकारिपुरुषाशक्तितारतम्येन उत्तरोत्तरमाविर्भावेऽपि अधिकारिपुरुषशक्तितारतम्येन द्वैतविशिष्टाद्वैतशिवाद्वैताद्वैतमतानां व्युत्क्रमेण उत्तरोत्तरमनुसरणीयत्वमभिप्रेत्य श्रीमदप्पय्यदीक्षितैः चतुर्मतसामरस्यमावहद्भिः चतुर्मतसारसंग्रहाख्यग्रन्थे 'आनन्दतीर्थमुनिलक्ष्मणदेशिकेन्द्रश्रीकण्ठयोगिपदवीरदवीयसीर्नः। आचार्यपादसरणिं च विविच्य बोद्धुं संगृह्यते मतचतुष्टयसारलेशः॥' इति प्रतिज्ञाय, न्यायमुक्तावली, नयमयूखमालिका, नयमणिमाला, नयमञ्जरी, इत्येवंनामभिः चतुर्भिः परिच्छेदैः क्रमेण द्वैतविशिष्टाद्वैतशिवाद्वैताद्वैतमतानि संगृहीतानि। तेषु च क्रमेण अद्वैतवासनाभिवृद्धिप्रकारः चतुर्मतसामरस्यनिबन्धेऽस्मिन् विशदीकृतोऽस्माभिः।

(१०) द्वैतादिमतचतुष्टयस्यापि मोक्षपदवीत्वं पूर्वोक्तश्लोके वर्णयन्तो हि दीक्षितचरणाः द्वैतादिमतानां सर्वेषामपि प्रामाणिकत्वं, अधिकारतारतम्येन सोपानारोहणन्यायेन सर्वस्यापि मतस्य मोक्षप्रापकमार्गत्वं सूतसंहिताद्युक्तं अत एव मिथोऽविरोधं चाभिप्रयन्ति।

(११) द्वैतादिमतेषु इतरमताप्रतिपादिताः असाधारणा ये भगवदुपासनप्रकारभेदा उक्ताः तद्विषये तेषां प्रामाण्यं इतराविरुद्धत्वं चाविचाल्यमेव। भगवत्पादैरपि बृहदारण्यकोपनिषदो द्वितीयाध्यायप्रथमब्राह्मणविवरणावसरे 'न च प्रमाणं प्रमाणान्तरेण विरुद्ध्यते। प्रमाणान्तराविषयमेव हि प्रमाणान्तरं ज्ञापयति' इत्यादिना निर्धारितमेतत्।

(१२) द्वैतादिमतत्रयस्य अद्वैतमतं प्रति अदवीयस्त्वं पूर्वोक्तश्लोके वर्णयन्तो दीक्षितचरणाः चतुर्मतानां परस्परं सामरस्यं संसूचयन्ति । तदवलं-ब्यास्माभिः चतुर्मतानां सामान्यतो विशेषतश्च बहुभिरंशैः सामरस्यं अस्मिन्निबन्धे प्रकाशितम् ।

(१३) एवं अप्पय्यदीक्षितचरणैः संसूचितं चतुर्मतसामरस्यं परि-शीलयन्तः चतुर्मतपण्डितास्सर्वेऽपि सहृदयाः द्वैतादिमतग्रन्थेषु तत्र तत्र उपलभ्य-मानान्यपि परस्परदूषणानि 'विरोधो नातीव स्फुरति नहिनिन्दानयविदाम्' इति श्रीदीक्षितवर्योक्तसरण्यैव तत्तन्मताभिरुचिजननार्थतया परामृशन्तः परस्परं सामरस्यबुद्धिमावहन्तु लोकक्षेमं चाभिवर्धयन्तु इति संप्रार्थये ॥

जंभरिपुनीलरुचिदृग्जनितमारा कुंभमदलोपकृदुरोजयुगभारा ।
शुंभमुखदेवरिपुबृन्दजयिसारा गुंभयतु मे गिरमुमा विधृतकीरा ॥१॥
शंबरसपत्नरिपवे कलितमोदे बिंबनिभदन्तपटि धूतनतखेदे ।
अंब धिषणां वितर दैत्यकुलभीदे शंबधरमुख्यसुरबृन्दनुतपादे ॥ २ ॥
पूरितपदाब्जनतिकृन्निखिलकामा दारितनिशाचरकुलाऽघहरनामा ।
ईरितगुणा श्रुतिगिरद्रिशयभामा साऽरततिमर्दयतु मौलिधृतसोमा ॥३॥
वेणीविजितपयोदां वाणीनिर्धूतकीरकुलनादाम् ।
एणीदृशं पुरारेः क्षोणीधरराजकन्यकां नौमि ॥ ४ ॥

इत्थं विद्वज्जनविधेयः

पोलकं. सु. श्रीरामशास्त्री

॥ श्रीः ॥

श्रीगुरुभ्यो नमः

॥ चतुर्मतसामरस्यम् ॥

(१) मङ्गलाचरणं प्रतिज्ञा च ।

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ १ ॥

द्वैतविशिष्टाद्वैते मते शिवाद्वैतमतमथाद्वैतम् ।
इति मतचतुष्टयमिदं समरसमन्योन्यमिति वदामोऽत्र ॥ २ ॥

अप्पय्यदीक्षितकृतौ हि चतुर्मतानां सारस्य संग्रह इति प्रथिते प्रबन्धे ।
आनन्दतीर्थमुनिलक्ष्मणदेशिकेन्द्रश्रीकण्ठयोगिपदवीरदवीयसीर्नः ॥ ३ ॥

इत्युक्तिपूर्वमुपवर्ण्य पुराऽऽनुपूर्व्यादाचार्यपादसरणिः प्रविवेचिताऽन्ते ।
तत्सूचितं मतचतुष्टयलेखपौर्वापर्यप्रयोजकमहं विमृशामि किंचित् ॥ ४ ॥

पुंभेदतोऽखिलमतस्य च मानभावं लक्ष्यैक्यमूलमविरोधमपि ब्रवीमि ।
मध्वादिदर्शितमतेषु मतान्तरेभ्यश्चाचार्यपादमतसन्निहितत्वमादौ ॥ ५ ॥

सर्वज्ञैः श्रीमदप्पय्यदीक्षितैस्तावत् न्यायमुक्तावलीनयमयूखमालिकानयमणिमालानयमञ्जरीनामकपरिच्छेदचतुष्टयोपेतः चतुर्मतसारसंग्रहनामा सर्वोत्तरः प्रबन्धः विनिर्मितो दरीदृश्यते । तत्र च परिच्छेदचतुष्टये क्रमेण मध्वरामानुजश्रीकण्ठभगवत्पादानां मतानि संगृहीतानि । यस्य चायमुपक्रमे पठितः श्लोकः—

आनन्दतीर्थमुनिलक्ष्मणदेशिकेन्द्रश्रीकण्ठयोगिपदवीरदवीयसीर्नः ।
आचार्यपादसरणिञ्च विविच्य बोद्धुं संगृह्यते मतचतुष्टयसारलेशः ॥इति॥

अत्र च श्लोके पदवीः सरणिमिति च पदप्रयोगेण मतचतुष्टयस्यापि मार्गरूपत्वम्, मध्वादिमतत्रयस्य 'नः' इत्यस्मच्छब्दोक्ताद्दैतिनामदवीयस्त्वञ्च कण्ठतः उक्त्वा, मध्वरामानुजश्रीकण्ठभगवत्पादमतानां क्रमपाठः कृतः। तेनार्थात् विषयचतुष्टयमुपक्षिप्तम् ।

(२) ग्रन्थप्रतिपाद्यं विषयचतुष्टयम् ।

तत्र प्रथमो विषयस्तावत् सर्वमतप्रामाण्यं नाम । सर्वमतप्रामाण्यानङ्गीकारे हि एकस्यैव प्रमाणत्वेनाभिमतस्य मतस्य मोक्षमार्गत्वसंभवेनान्येषामप्रमाणत्वेनाभिमतानां मोक्षमार्गत्वासंभवेन च सर्वेषामपि मतानां मार्गत्वकीर्तनासाङ्गत्यापत्तेः ।

द्वितीयो विषयः सर्वेषामपि मतानामन्योन्यमविरुद्धत्वं नाम । स्वस्वतात्पर्यविषयीभूतोपेयरूपार्थविरोधे हि मिथः मतानां विरोधस्स्यात् । न तु तात्पर्याविषयोपायरूपार्थविरोधात् विरोधः । मतानां मार्गत्वकीर्तनेन च मतानां मार्गभेदत्वमात्रं, न तु तत्प्राप्यभेदः इति सूचनात् मतानां मिथोऽविरुद्धत्वमाविष्कृतम् ।

तृतीयो विषयः मध्वादिमतत्रयापेक्षया मतान्तराणां भगवत्पादमतविप्रकृष्टत्वं, मध्वादिमतत्रयस्यैव तु भगवत्पादमतसंनिकृष्टत्वमित्येतत् । इदं च विशिष्य मतत्रयस्यादवीयस्त्वकीर्तनेनेतरेषां दवीयस्त्वोपक्षेपात् लब्धम् ।

तुरीयो विषयः—भगवत्पादमतस्य मोक्षाव्यवहितपूर्वभूमिकात्वेन श्रीमद्दीक्षितेन्द्रसंमतस्याव्यवहितपूर्वभूमिका श्रीकण्ठमतम्, तदुभयव्यवहितमोक्षपूर्वभूमिका रामानुजमतम्, तत्त्रितयव्यवहितमोक्षपूर्वभूमिका मध्वमतम्, तथा च मध्वरामानुजश्रीकण्ठभगवत्पादमतानां मोक्षप्राप्तौ क्रमिकभूमिकाचतुष्टयात्मकत्व-

मित्येतत्। एतदभिप्रायकत्वानाश्रयणे च दीक्षितेन्द्राणां क्रमान्तरपरित्यागेन मध्वरामानुजश्रीकण्ठभगवत्पादमतानां प्रथमद्वितीयतृतीयतुरीयभावेन निर्देशस्य निर्बीजत्वापत्तेः। दीक्षितेन्द्राणामप्यभिमते तदीयग्रन्थपरिशीलनलभ्ये तदीयमत-चतुष्टयक्रमनिर्देशमुख्यप्रयोजके संभवति तत्परित्यागेन केवलमशोकवनिकान्यायेन क्रमनिर्देशस्य तदीयेच्छामात्रनिबन्धनत्वोक्त्ययोगात्।

दीक्षितेन्द्राणाञ्च मध्वरामानुजश्रीकण्ठाचार्येषु मुनिः, देशिकेन्द्रः, योगी, इति च पदप्रयोगेण तेष्वादरसद्भावावगमेऽपि, भगवत्पादेषु नामनिर्देशं विना आचार्यपादपदमात्रप्रयोगेण तेष्वादरातिशयस्य भक्त्यतिशयस्य चाविष्कारेण भगवत्पादमते मोक्षाव्यवहितभूमिकात्वं दीक्षितेन्द्राणामभिमतमिति सहृदयहृदय-साक्षिकमेव वस्तुतत्त्वम्। तच्च विषयचतुष्टयं क्रमेणास्मिन् लघुनिबन्धे निरूपयामः॥

(३) प्रथमो विषयः सर्वमतप्रामाण्यम्।

प्रथमं तावत् सर्वमतप्रामाण्यं संग्रहेण निरूप्यते—

‘गुरवे सर्वलोकानां भिषजे भवरोगिणाम्।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः॥’

इति परमप्राचीनहृद्यपद्ये द्वितीयपादेन ‘भिषक्तमं त्वां भिषजां शृणोमि’ ‘प्रथमो दैव्यो भिषक्’ इत्यादिश्रुत्यनुसारेण भवरोगिमहाभिषक्त्वेन भगवान् ज्ञानचन्द्रकलाचूडः ब्रह्मविद्याधिदैवतोमार्धविग्रहः सर्वज्ञः परमकारुणिकः परमेश्वरः विनिर्दिष्टः। प्रथमपादेन च “स पूर्वेषामपि गुरुः कालेनानवच्छेदात्” इत्यादियोगसूत्राद्यनुसारेण भवरोगमहाभिषक्त्वोचितेन भवरोगनिदानाज्ञानोन्मूलक-ज्ञानमहौषधप्रदातृत्वरूपेण सर्वलोकगुरुत्वेन स एव विनिर्दिष्टः। तृतीयपादेन च “ईशानस्सर्वविद्यानाम्” इत्यादिश्रुत्यनुसारेण, विविधकर्मपरिपाकायत्त-विविधचित्तावस्थाशालिनां, अत एव दृढत्वशैथिल्याधिक्यन्यूनत्वादिभेदेन भवरोगं

तारतम्येनानुभवतां सर्वेषां भवरोगिणामेकरूपचिकित्सायाः करणायोगेन सर्व-भवरोगिचिकित्सकत्वोचितेन सर्वेषामपि भवरोगाऽऽत्यन्तिकनिवृत्तिहेतुभूतज्ञान-महौषधपानयोग्यतापादकतत्पूर्वानुष्ठेयबहुविधभवरोगितत्तदवस्थोचितनानाविधसाध-नभेदरूपनानाविधावान्तरौषधविशेषबोधकनानामतमूलभूतनानाविद्यास्वरूपभवरो-गचिकित्साशास्त्रभेदप्रवर्तकत्वरूपेण सर्वविद्यानिधित्वेन च स एव विनिर्दिष्टः ।

एवञ्च सर्वेषामपि भवरोगिजनानामुद्दिधीर्षया भगवता दक्षिणामूर्तिरूपेण परमेश्वरेण साक्षात् परंपरया च प्रवर्तितासु भवरोगचिकित्साशास्त्ररूपासु, आवात्स्यायनतन्त्रमाश्रुतिशिरस्सिद्धान्तं उच्चावचभेदभिन्नासु, तत्तन्मतावलम्बिभिरा-दृतासु, परस्परविलक्षणत्वेऽपि साक्षात् परंपरया वा परमपुरुषार्थैकप्रयोजनिकासु, सर्वास्वपि विद्यासु कस्या अपि नाप्रामाण्यगन्धोऽपि । अपि तु अधिकारि-पुरुषभेदेन, एकस्याप्यधिकारिणः चित्तशुद्धितारतम्याधीनावस्थाभेदेन सोपाना-रोहणन्यायेन भूमिकाक्रमेण च कर्मयोगज्ञानयोगवत् प्रामाण्यमेवेति स्कान्दमहा-पुराणान्तर्गतसूतसंहितायां यज्ञवैभवखण्डे सर्वमार्गप्रामाण्यनिरूपणावसरे—

"तानि मानानि कथितानि मनीषिभिः ।
अधिकारिविभेदेन नैकस्यैव सदा द्विजाः ॥
तर्कैरेते हि मार्गास्तु न हन्तव्या मनीषिभिः ।" इति,
'सोपानक्रमतो देवाः वेदमार्गस्य हेतवः' इति,
अतोऽधिकारिभेदेन मार्गा मानं न संशयः' इति,
'तस्मादुक्तेन मार्गेण शिवेन कथिता अमी ।
मार्गा मानं न चेन्मानं मृषावादी कथं शिवः ॥
महाकारुणिको देवः सर्वज्ञो निर्मलः खलु ।'

इति चैवमादिना असंदिग्धमुपपादितं लोकानुग्रहैकप्रयोजनाय कृतशरीरपरिग्रहेण भगवता कृष्णद्वैपायनेन महर्षिप्रवरेण ।

" साख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा ।
आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः ॥ "

इति महाभारतेऽपि तेनैव सांख्याद्युपलक्षितसर्वमार्गप्रामाण्यमुपक्षिप्तम् । तत्त्पुराणादिगता तन्त्रनिन्दापि न तन्त्राप्रामाण्यतात्पर्येण, अपि तु तन्त्राधिकारिभिन्नाधिकारिणां तन्त्रप्रवृत्तिनिरासतात्पर्येणेति कथितं साम्बपुराणे—

" निन्दा स्मृतिपुराणेषु या तन्त्रविषयानघ ।
अपेक्ष्य वेदमार्गार्हं प्रवृत्ता सा न संशयः ॥ " इति ।

" लोकायताद्यमखिलं शास्त्रं शंभुविनिर्मितम् ।
अधिकारिविभेदेन प्रमाणं नात्र संशयः ॥
परस्परविरुद्धत्वेऽप्येतेषां सर्ववर्त्मनाम् ।
पुंविशेषान् समुद्दिश्य प्रामाण्यं केन वार्यते ॥
प्रामाण्यं सर्वमार्गाणामेकमुद्दिश्य यो वदेत् ।
व्याहतं तद्वाक्यमेव न मद्वाक्यं न संशयः ॥
प्रामाण्यं सर्वमार्गाणां पुंभेदेनापि नैव चेत् ।
तर्हि कस्यापि मार्गस्य प्रामाण्यं नैव विद्यते ॥ "

इत्यादिना पुरुषार्थप्रबोधे ब्रह्मानन्दभारतीभिः सर्वमार्गप्रामाण्यं सहेतुकं समर्थितम् ।

बहुभिश्च पूर्वाचार्यैः परमार्थविद्भिः सर्वेषामपि मतानां प्रामाण्यं प्रसाधितं तत्र तत्र ग्रन्थेषु । विस्तरभिया न लिख्यते ॥

(४) द्वितीयो विषयः सर्वमतानामन्योन्याविरोधः ।

अथ पूर्वं प्रतिज्ञातविषयचतुष्टये द्वितीयं सर्वेषामपि मतानामन्योन्यमविरुद्धत्वमपि संग्रहेण निरूप्यते । सूतसंहितायामेव भगवता बादरायणेन—

"यथा तोयप्रवाहाणां समुद्रः परमावधिः ।
तथैव सर्वमार्गाणां साक्षान्निष्ठा महेश्वरः ॥" इति,

"वेदास्सर्वे पुराणानि स्मृतयो भारतं तथा ।
अन्यान्यपि च शास्त्राणि तथा तर्काश्च सर्वशः ॥

शैवागमाश्च विविधा आगमा वैष्णवा अपि ।
अन्यागमाश्च विदुषामनुभूतिस्तथैव च ॥

अस्मिन्नर्थे स्वसंवेद्ये पर्यवस्यन्ति नान्यथा ।
बाध्यबाधकतां यान्ति व्यवहारे परस्परम् ॥

समुद्र इव कल्लोला इति वेदार्थसंग्रहः ।"

इति चैवमादिना अविवक्षिते तत्तन्मतप्रतिपादितोपायरूपे व्यावहारिकप्रपञ्चे मतानां परस्परं वैमत्येऽपि, विवक्षिते उपेये पारमार्थिके सर्वमतनिष्ठाभूते आत्मतत्त्वे सर्वेषामपि मतानां पर्यवसानेन अवैमत्यात् लक्ष्यैक्येन सर्वमतानां मिथोऽविरुद्धत्वमुद्घोषितम् ।

भगवता पराशरेणापि पराशरपुराणे—

"शास्त्रमापाततो भाति मुने बहुमुखं नृणाम् ।
निरूपितन्तु न्यायेन विभात्येकमुखं पुनः ॥"

इत्यादिना उपायांशमादाय शास्त्रस्य बहुमुखत्वेऽपि उपेयांशमादायैकमुखत्वमुक्तम् । अत्र शास्त्रमापाततो बहुमुखं निरूपितन्तु एकमुखमित्यस्य चायमर्थः—आपाततः—तात्पर्यविषयोपेयापरामर्शेन आपातदृष्ट्या तात्पर्याविषयोपायमात्रपरामर्शे, शास्त्रं बहुमुखम्—परस्परविरुद्धनानार्थबोधकम्, निरूपितन्तु—तात्पर्यविषयोपेयपरामर्शेन तत्वदृष्ट्या निर्धारितन्तु, एकमुखम्—एकस्यैव परस्पराविरुद्धस्य आत्मतत्वरूपार्थस्य बोधकमिति ॥

यतिधर्मप्रबोधेऽपि श्रीनीलकण्ठयतीन्द्रैरुक्तम्—

"शास्त्रमज्ञस्य बहुधा विभात्येकं विवेकिनः ।
मेय एकत्र द्रष्टारो भिद्यन्ते तन्न भिद्यते ॥" इति ।

"बहुधाऽप्यागमैर्भिन्नाः पन्थानस्सिद्धिहेतवः ।
त्वय्येव निपतन्त्योघाः जाह्नवीया इवार्णवे ॥"

इति कविकुलतिलकेन कालिदासेन,

"त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यात् ऋजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥"

इति शिवमहिम्नस्स्तवे गन्धर्वराजेन पुष्पदन्तेन,

"नानाविधैरागममार्गभेदैरादिश्यमाना बहवोऽभ्युपायाः ।
एकत्र ते श्रेयसि संपतन्ति सिन्धौ प्रवाहा इव जाह्नवीयाः ॥"

इति न्यायमञ्जर्यां जयन्तभट्टेन च सर्वमार्गाणामेकत्र लक्ष्ये पर्यवसानं सोदाहरणमुपवर्णितम् ।

'शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते' इति वाक्यपदीये भगवता भर्तृहरिणा,

"तस्मादात्मज्ञानं सन्तो मोक्षप्राप्तौ हेतुं प्राहुः ।
तीर्थे तीर्थे तच्चाचार्यैस्तैस्तैरुक्तं संज्ञाभेदैः ॥"

इति न्यायमञ्जर्यां जयन्तभट्टेन च, शास्त्रेषु परस्परं प्रतिपादनप्रक्रियाभेद एव न तु प्रतिपाद्यभेदः इति, प्रतिपाद्यस्यापि संज्ञाभेदमात्रं न संज्ञिभेदः इति चोक्तम् ।

तत्त्वचन्द्रिकायामुमामहेश्वरशास्त्रिभिः उदाहृतैः—

“कणादकपिलाद्यैस्तु मुनीन्द्रैरपि कीर्तितम् ।
मन्दबुद्ध्यनुसारेण केवलं परिकीर्तितम् ॥

अत एव मुनीनान्तु विरोधो नास्ति कश्चन ।
अन्यथा ते विरुद्धार्थं कथं ब्रूयुर्मनीषिणः ॥

ब्रह्मविष्णुमहादेवप्रमुखैः परिकीर्तिताः ।
आगमाश्चानया नेया दिशा नैवाऽन्यथा बुधाः ॥

अन्यथा ते तु नेयाश्चेत् विरुद्धास्स्युर्न संशयः ।
कथं ते निर्गता वेदविरुद्धार्थविभाषिणः ॥

अत एव न कस्यापि विरोधो ह्यस्ति कश्चन ।
स्वतन्त्रा आगमास्सर्वे निर्मलैः परिकीर्तिताः ॥
अधिकारिविशेषेण प्रवृत्ता न हि संशयः ।”

इत्यादिमानवपुराणवचनैरपि सर्वमार्गाणामविरुद्धत्वं सर्वमार्गप्रवर्तकानामभ्रान्तत्वञ्च स्फुटीकृतम् ।

भगवत्पादैरपि ‘वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा’ इति, ‘तान्यपि(तर्कस्मरणानि)तर्कोपपत्तिभ्यां तत्वज्ञानायोपकुर्वन्तीति चेदुपकुर्वन्तु नाम’ इति चैवमादिवचनैः तर्कादिसमयानां न केवलमविरोधित्वं, अपि तु वेदान्तोपकारकत्वमपीति कीर्तितम् ।

‘अध्वरमीमांसायां न्याये च वेदप्रत्यक्षादिप्रामाण्यपरिशोधनादिपूक्तास्तर्काः’ इति तर्कपदं विवृण्वता श्रीवाचस्पतिमिश्रेण तत्वज्ञानोपकारकन्यायादिशास्त्रगततर्कस्वरूपं प्रकाशितम् । कल्पतर्वादिषु ग्रन्थेषु तर्कादिसमयानामुपकारकत्वं स्फुटं विशदीकृतम् ।

सर्वदर्शनावलम्बिभिरपि सविशेषं पुरस्कृतैः षड्दर्शिनीटीकाकारैस्सर्वदर्शनतात्पर्यविद्भिः श्रीवाचस्पतिमिश्रैरपि योगप्रत्युक्त्यधिकरणे 'नानेन योगशास्त्रस्य हैरण्यगर्भपातञ्जलादेः सर्वथा प्रामाण्यं निराक्रियते, किं तु जगदुपादानस्वतन्त्रप्रधानतद्विकारमहदहङ्कारपञ्चतन्मात्रगोचरं प्रामाण्यं नास्तीत्युच्यते, नचैतावतैषामप्रामाण्यं भवितुमर्हति। यत्पराणि हि तानि तत्राप्रामाण्ये अप्रामाण्यमश्नुवीरन्। नचैतानि प्रधानादिसद्भावपराणि, किं तु योगस्वरूपतत्साधनतदवान्तरफलविभूतितत्परमफलकैवल्यव्युत्पादनपराणि, तच्च किंचिन्निमित्तीकृत्य व्युत्पाद्यमिति प्रधानं सविकारं निमित्तीकृतम्, पुराणेष्विव सर्गप्रतिसर्गवंशमन्वन्तरवंशानुचरितं तत्प्रतिपादनपरेषु, न तु तद्विवक्षितम्' इत्यादिवचनैः योगोपलक्षितसर्वसमयानां विवक्षिताविवक्षितविषयद्वयोपन्यासपूर्वकं अविवक्षिते वेदान्तविरुद्धे अप्रामाण्यस्य, विवक्षिते वेदान्ताविरुद्धे प्रामाण्यस्य च निरूपणेन विवक्षितांशमादाय सर्वमताविरोधः स्फुटं प्रत्यपादि।

'यदर्थः सर्वशास्त्रारम्भः' इति बृहदारण्यकभाष्यवाक्यव्याख्यानरूपैः—

"यदर्थं सर्वशास्त्राणां प्रवृत्तिरतिविस्तरा।
आत्मज्ञानावतारार्थः सर्वशास्त्रसमुद्यमः॥

संसारोच्छेदमेवामी फलं शास्त्रकृतोऽब्रुवन्।
स्वत एव मनुष्याणां प्रवृत्तिर्भोगसिद्धये॥

तत्रानुवादि शास्त्रं स्यात् निवृत्तावेव तन्मितिः।
विरोधस्सर्वशास्त्रेषु पदार्थानां व्यवस्थितौ॥

युक्तस्तात्पर्यहीनत्वाच्छ्रुतौ सृष्टिविगानवत्।
अपि वात्स्यायनादीनां शास्त्राणां द्वारभेदतः॥

प्रामाण्यमविरुद्धं स्यात् ऐकात्म्यज्ञानजन्मने।
प्रवर्तमानः कामेषु शास्त्रदीपितवर्त्मना॥

दुर्लभत्वादिकान्दोषान् दृष्ट्वाऽतो विनिवर्तते ।
अनित्यदुःखशून्यत्वं पदार्थानां स्फुटं ब्रुवन् ॥
बुद्धोऽपि रागाद्युच्छित्तौ यतते नात्मनिह्नुतौ ।”

इत्यादिभिः वार्तिककृतत्सारवचनैः सर्वमतसामरस्यं सारस्येन वर्णितम् ।

भगवत्पादैरेव सर्ववेदान्तसिद्धान्तसारसंग्रहाख्ये प्रकरणे—

“जीवन्मुक्तिपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तित्वं पवनोऽस्पन्दतामिव ॥

ततस्तत्संबभूवासौ यद्गिरामप्यगोचरः ।
यच्छून्यवादिनां शून्यं ब्रह्म ब्रह्मविदाञ्च यत् ॥

विज्ञानमात्रं विज्ञानविदां यदमलं पदम् ।
पुरुषस्सांख्यदृष्टीनामीश्वरो योगवादिनाम् ॥

शिवश्शैवागमस्थानां कालः कालैकवादिनाम् ।
यत्सर्वशास्त्रसिद्धान्तः यत्सर्वहृदयानुगम् ॥

यत्सर्वं सर्वगं वस्तु तत्तत्वं तदसौ स्थितः ।”

इत्यादिना स्फुटीकृतमेतत् । ज्ञानवासिष्ठेऽपि उपशमप्रकरणे (८७) सर्गे ‘यच्छून्यवादिना’मित्यादिश्लोका दृश्यन्ते ।

‘आत्मात्मनस्तद्विदुषां नैरात्म्यं तादृशात्मनाम् ।
मध्यं माध्यमिकानां च सर्वं सुसमचेतसाम् ॥’

इत्यधिकं तत्र दृश्यते ।

तन्त्रसिद्धान्तवेदान्तोभयमर्मविद्भिः श्रीभास्कररायैरपि सेतुबन्धत्रिपुरामहोपनिषद्भाष्यादिषु तत्तद्विद्याप्रशंसकानां तन्निन्दकानाञ्च बहूनां स्मृतिपुराणादिगतवचनानामभिप्रायवर्णनपूर्वकं सर्वेषामपि मतानामधरोत्तरभूमिकारूपत्वेनाविरोधित्वमुपपादितम् । अधिकारानुगुण्येन भूमिकाभेदानां प्रकाशनाप्रकाशने च

कर्तव्यतया निरूपिते। पूर्वभूमिकाधिरूढानामुत्तरभूमिकाधिकारिणामुत्तरभूमिकाया अप्रकाशने संप्रदायविच्छेदापत्तेः, पूर्वभूमिकायामनधिरूढानामुत्तरभूमिकानधिकारिणामुत्तरभूमिकाप्रकाशने तेषामुभयभ्रष्टत्वापत्तेश्च। तदीयानि चेमानि वाक्यानि—

"जगदाप्तपरमशिवप्रणीतत्वाविशेषेण सर्वासां विद्यानां अधिकारिभेदेन प्रामाण्यमेवेति स्पष्टं सूतसंहितादौ। अधिकारश्च यथा नास्तिकानामेव आर्हतादिदर्शनेषु, त्रैवर्णिकादेरेव वैदिकमार्गेष्विति पुरुषभेदेनैव व्यवस्थितः, तथा एकस्यापि पुरुषस्य चित्तशुद्धितारतम्यादपि स व्यवस्थितः। वर्णभेदेनेव आश्रमभेदेनापि धर्मव्यवस्थादर्शनात्। एवञ्च यानि तत्तद्विद्याप्रशंसकानि वचनानि तानि तत्तदधिकारिणं प्रत्येव प्रवर्तकानि, यानि च तन्निन्दकानि तानि तत्तदनधिकारिणं प्रति निवर्तकानि, न पुनः न हि निन्दान्यायेन विधेयस्तावकानि, अतिबाल्यदशायां बालक्रीडनके प्रवर्तयतामेव पित्रादीनां तस्यैवाध्ययनाधिकारे तादृशक्रीडायां ताडनकर्तृत्वदर्शनात्।

तदयं मथितोऽर्थः, जातमात्रस्य त्रैवर्णिकस्य पुरुषस्य क्रीडाधिकारे निवृत्ते अक्षराभ्यासः, ततः छन्दोभाषाज्ञानार्थं काव्याध्ययने प्रवर्तकानि 'अदोषं गुणवत्काव्यम्' इत्यादीन्यग्निपुराणवचनानि, व्युत्पन्नस्य तु "काव्यालापांश्च वर्जयेत्" इति निषेधः। काव्याध्ययनजन्यप्रयोजनस्य जातत्वेन उत्तरभूमिकायामेवाधिकारात् तां विहाय पूर्वभूमिकायामेव आयुः क्षपयतोऽनिष्टं भवतीति तदर्थः। ततो देहाद्यतिरिक्तत्वेनात्मनो ज्ञानार्थं न्यायशास्त्राध्ययने विधिः "शुङ्गेनात्मानमन्विच्छ" इत्यादिः। शुङ्गं हेतुरवयवसमुदायात्मकन्याय इति यावत्। देहादिभिन्नत्वेन आमुष्मिकयातायातक्षमतया आत्मनि ज्ञाते तु तादृशफलकर्मस्वधिकारात् "आन्वीक्षकीं तर्कविद्यामनुरक्तो निरर्थिकाम्" इत्यादयो निषेधाः पूर्वभूमिकां निषेधन्ति। "धर्ममेवाचरेत् प्राज्ञः" इत्यादिविधयः उत्तरभूमिकायां प्रवर्तयन्ति, तदुपयोगित्वेन पूर्वमीमांसायाः वेदे कर्मकाण्डस्य चाध्ययनम्।

तेन धर्मार्थकामेषु साधितेषु चतुर्थपुरुषार्थलिप्सया पूर्वभूमिकात्यागाय "नास्त्यकृतः कृतेन" इति कर्मनिन्दा। अथ "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" इत्यादयो विधयः उत्तरभूमिकाप्रवर्तकाः। तदुपयोगितया च वेदे उपनिषत्काण्डस्य उत्तरमीमांसायाश्चाध्ययनम्। ब्रह्मज्ञानञ्च द्विविधं शाब्दं अपरोक्षानुभवरूपञ्च,

"शास्त्रदृष्टिर्गुरोर्वाक्यं तृतीयस्त्वात्मनिश्चयः।
अन्तर्गतं तमश्छेत्तुं शाब्दबोधो न हि क्षमः॥"

इत्यादिज्ञापकात्। तेन शाब्दभूमिकालाभोत्तरं तत्रायुःक्षपणनिषेधार्थाः 'पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्' इत्यादयः। कर्मभूमिकाया अनन्तरमपरोक्षानुभवरूपभूमिकातः प्राक्च भक्तिरूपा एका बह्ववान्तरभूमिकाभेदोपेता महती भूमिका। तदुपयोगित्वेन भक्तिमीमांसाध्ययनम्। भक्तिश्च अपरोक्षज्ञानभूमिकान्तमनुवर्तते। तल्लाभोत्तरमपरोक्षानुभवरूपभूमिकालाभः। सैव च जीवन्मुक्तिः। तदव्यवहितोत्तरमेव च विदेहकैवल्यम्।

न्यायादिशास्त्रेषु स्वस्वभूमिकालाभमात्रेण मोक्षप्राप्तिवर्णनं तु उत्तरोत्तरभूमिकानामपह्नवेनैव। पुरुषार्थप्राप्तौ विलम्बशङ्कया प्रवृत्त्यभावनिरासेन तस्यादोषत्वात्। यानि च 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' 'यमेवैष वृणुते तेन लभ्यः' इत्यादीनि कर्मभक्तिमात्रयोस्साधनत्वप्रतिपादकवचनानि तेष्वेवकारः स्वस्वभूमिकासाध्ये उत्तरभूमिकाधिकाररूपफले साधनान्तरनिरासार्थः, न पुनः उत्तरभूमिकाभावबोधकः। 'ज्ञानादेव तु कैवल्य'मित्यत्र तु अनुभवात् परतस्साधनान्तररूपाया भूमिकायाः अभावात् तदभावबोधक एव इति, सर्वेषां तत्तद्विद्याप्रवर्तकानां ऋषीणां न मिथो विरोधः' इति।

'उत्तरभूमिकाधिरूढैरपि पूर्वभूमिकाया अनिरासेन समर्थनं स्वभूमिकाया अप्रकाशनञ्चावश्यं कार्यं, अन्यथा पूर्वभूमिकाधिकारिणां चित्तपरिपाकविशेषमन्तरेण उत्तरभूमिकायां विश्वासानुदयात् निरसनयुक्तिभिः स्वकीयपूर्वभूमि-

कायामविश्वासाच्चोभयभ्रष्टतापत्तेः। एतदभिप्रायेणैव 'निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः' इति विधिनिषेधातीतानामपि जीवन्मुक्तानां 'लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि' इति विधिः, 'न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम्' इति निषेधश्च भगवद्गीतासु दृश्यते' इति च ॥

'निस्त्रैगुण्ये' इति श्लोके 'को विधिः को निषेधः' इति किंशब्दयोः प्रश्नार्थकत्वमभिप्रेत्य तदुत्तरतया 'लोकसंग्रहम्' 'न बुद्धिभेदम्' इति गीतार्थद्वयस्य योजने चमत्कारातिशय इति वयं पश्यामः ॥

भगवत्पादैरपि 'न हि न हि रक्षति डुकृञ्करणे' इति 'वृथा कण्ठक्षोभं वहसि सहसा तर्कवचसा' इति च उत्तरभूमिकाधिरूढेन व्याकरणतर्कादिशास्त्र एव आयुःक्षपणं विनिन्दितम्।

श्रीमद्दीक्षितेन्द्रैरपि—

'यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि ।
सा सैव प्रक्रियेह स्यात् साध्वी सा चानवस्थिता ॥"

इति वार्तिकवचनानुरोधेन, एकैव भगवत्पाददिव्यसूक्तिरधिकारिभेदेन पूर्वाचार्यानुपेत्य सहस्रधा अधिगतभिदा, तथापि ब्रह्माद्वयैकपरायणेति, आत्मैक्यसिद्धौ परं सन्नह्यद्भिः प्राचीनैरात्मैक्यसिद्ध्युपायेषु व्यवहारसिद्धविषयेष्वधिकारिभेदानुरोधेनानादरात् नानाविधाः सरणयो दर्शिता इति च, सिद्धान्तलेशसंग्रहप्रमुखे कथितम्।

'अकल्पितवस्तुप्रतिपत्त्युपायतया कल्प्यमाने विगानं क्वचिदपि न दोषः, यथा तात्त्विकारुन्धतीप्रतिपत्त्युपायतया नानापुरुषैः कल्प्यमानायां तत्तत्प्राच्योदीच्यादिनक्षत्ररूपायां स्थूलारुन्धत्यां, यथा वा रेखागवयन्यायेन नित्यशब्दप्रतिपत्त्युपायतया नानाव्याकरणैः परस्परभिन्नप्रकृतिप्रत्ययविभागेन कल्पिते कृत्रिमशब्दे' इति च परिमले तैरेवोक्तम्। युज्यते च तत्। विवक्षितवस्तु-

प्रतिपत्त्युपायतया विरुद्धनानाप्रकारप्रदर्शनमाचार्याणां न दोषाय भवति, किंतु अलङ्कारायैव भवति। प्रतिपत्तॄणां प्रज्ञावैचित्र्येण कस्यचित्प्रतिपत्तुः केनचित्प्रकारेण मुक्तिसाधनब्रह्मात्मैक्यज्ञानलाभात्। एवमियता प्रबन्धेन सर्वेषामेव मतानां मिथोऽविरोधित्वं उक्तम्॥

(५) तृतीयो विषयः मध्वरामानुजश्रीकण्ठमतत्रयस्य भगवत्पादमतसन्निकर्षः मतान्तराणां विप्रकर्षश्च।

अथ प्रतिज्ञातविषयचतुष्टये तृतीयं मतान्तराणां भगवत्पादमतविप्रकृष्टत्वं मध्वरामानुजश्रीकण्ठमतत्रयस्य तत्सन्निकृष्टत्वञ्च निरूप्यते। भगवत्पादैरेव हि 'स च (प्रधानवादः) कार्यकारणानन्यत्वाभ्युपगमात् प्रत्यासन्नो वेदान्तवादस्य' इति, 'वैदिकस्य च दर्शनस्य प्रत्यासन्नत्वात्' इति च वाक्येन प्रधानवादः कार्यकारणानन्यत्वसत्कार्यत्वात्मासङ्गत्वस्वप्रकाशत्वाद्यंशैः वेदान्तवादप्रत्यासन्नः, न तथा परमाण्वादिवादः इति कस्यचिन्मतस्य प्रत्यासन्नत्वं कस्यचिद्विप्रकृष्टत्वञ्च व्यवहृतम्।

संक्षेपशारीरकेऽपि—

'विवर्तवादस्य हि पूर्वभूमिः वेदान्तवादे परिणामवादः।
व्यवस्थितेऽस्मिन्परिणामवादे स्वयं समायाति विवर्तवादः॥

प्रत्यासन्ना परिणतिरियं विप्रकृष्टस्तु पूर्वः
संघातादिस्सकल उदितो वेदसिद्धान्तसिद्धेः।'

इत्यादिना केवलभेदगर्भारम्भवादाद्यपेक्षया भेदाभेदगर्भपरिणामवादस्य केवलाभेदगर्भविवर्तवादात्मकवेदान्तवादप्रत्यासन्नत्वं व्यवहृतम्। एवं पूर्वाचार्यप्रदर्शितमार्गेणैव मध्वादिमतत्रयस्यापि भगवत्पादमतप्रत्यासन्नत्वं तदितरमतानां तद्विप्रकृष्टत्वञ्चाभ्यूहितुमुचितमेव। तदेतत्संक्षेपेण प्रदर्श्यते—

पूर्वोक्तप्रकारेण वात्स्यायनीयादीनां सर्वेषामपि मार्गाणामधिकारिभेदेन प्रामाण्ये सिद्धेऽपि,

'वेदमार्गजनितन्तु वेदनं दोषहीनमतिशोभनं सदा ।
अन्यमार्गजनितं विचारतो वेदमार्गरुचिकारणं क्रमात् ॥' इति,

'तथा वेदसमं मानं नास्ति तत्र न संशयः ।' इति,

'तत्प्रसादात् क्रमात् मार्गान्विशिष्टानेति मानवः ।
तत्र तत्र स्थितो देवः प्रसादं कुरुतेऽस्य तु ॥
सोपानक्रमतो देवा वेदमार्गस्य हेतवः ।
वेदमार्गस्थितो देवः साक्षान्मुक्तेस्तु कारणम् ॥
तत्रापि कर्मभागस्थः ज्ञानश्रद्धाप्रदो हरः ।
ज्ञानमार्गस्थितश्शम्भुः ज्ञानद्वारेण मोक्षदः ॥
अतो वेदस्थितो मर्त्यो नान्यमार्गं समाश्रयेत् ।
वेदमार्गैकनिष्ठानां न किञ्चिदपि दुर्लभम् ॥' इति,

'तथापि वेदो मार्गाणामुत्तमस्सर्वसाधकः'

इति चैवमादिसूतसंहितावचनैः,

'किं बहूक्त्या वेदमार्गसौधसंप्राप्तये नृणाम् ।
दृढनिश्रेणिकापर्वाण्येव तन्त्राणि सर्वथा ॥
निश्रेणिकापर्वरूपमार्गाणामुच्चनीचता ।
विशिष्टधर्मकथनव्याजेन करुणाबलात् ॥
ऋषिभ्यः कावषेयेभ्यः कुमारेण प्रकीर्तिता ।'

इत्यादिना 'पुरुषार्थप्रबोध'गतेन ब्रह्मानन्दभारतीवचनेन च, सर्वमार्गोत्तमत्वं सर्वमार्गप्राप्यत्वं सर्वोत्तमाधिकारिकत्वञ्च अपौरुषेय्याः श्रुतेरेव इति, तत्रापि श्रुतिशिरोभूताया उपनिषद एव इति च निर्विवादमास्तिकोत्तमानां वैदिकानां सर्वेषामपि।

(६) चतुर्मतानां सामान्यतस्सामरस्यम् ।

मुक्तिसौधारोहणसाधनीभूतनिश्रेणिकाचरमपर्वरूपाणाञ्चोपनिषदां तात्पर्यनिर्णायकब्रह्मसूत्रविवरणरूपत्वेन च मतान्तरेभ्यः मध्वादिमतत्रयं भगवत्पादमतप्रत्यासन्नम् । तत्प्रत्यासत्तौ हेत्वन्तराण्यपि प्रदर्श्यन्ते—

(१) स्वभाववादनिरासेन कार्यकारणभावाभ्युपगमः (२) चार्वाकमतनिरासेन शरीरेन्द्रियाद्यतिरिक्तात्माभ्युपगमः, (३) प्रत्यक्षातिरिक्तप्रमाणाभ्युपगमः (४) वेदप्रामाण्यस्वीकारः (५) शरीरपरिमाणात्माभ्युपगन्तृजैनमतनिरासः (६) क्षणिकविज्ञानात्मवादशून्यवादसर्वपदार्थक्षणिकत्वतुच्छत्वाभ्युपगन्तृबौद्धवादनिरासः (७) वर्णाश्रमादिव्यवस्थास्वीकार; (८) नरकस्वर्गाद्यभ्युपगमः (९) प्रमाणानां परतः प्रामाण्यस्य नैयायिकाद्यभ्युपगतस्य, स्वतोऽप्रामाण्यस्य च बौद्धाभ्युपगतस्य निरासेन स्वतः प्रामाण्याभ्युपगमः (१०) तार्किकाद्यभ्युपगतस्य असत्कार्यवादस्य निरासेन सत्कार्यवादस्थिरीकारः (११) ईश्वरानभ्युपगन्तृजैमिनिकपिलदर्शननास्तिकदर्शननिरासेन ईश्वरस्थापनम् (१२) अनुमानावष्टंभेन जगन्मूलकारणाभ्युपगन्तृतार्किकसांख्यादिनिरासेन श्रुत्यवष्टंभेनैव तदभ्युपगमः (१३) ईश्वरस्य ऐश्वर्यवर्णनेऽपि स्पष्टं जगत्कारणत्वस्यावर्णयितॄणां योगिनां मतनिरासेन ईश्वरजगत्कारणत्ववर्णनम् ।

(१४) ईश्वरस्य जगत्सर्जने कर्मानपेक्षत्ववादिपाशुपतदर्शननिरासेन कर्मसापेक्षत्ववर्णनम् (१५) ईश्वरस्य निर्दोषानन्तकल्याणगुणाकरत्वसशरीरत्ववर्णनम् (१६) ईश्वरस्य जीवं प्रति कारयितृत्वस्य कर्मफलप्रदत्वस्य चाभ्युपगमः (१७) सृष्टिप्रलयाद्यभ्युपगमः (१८) संसारानादित्वस्वीकारः (१९) कर्मभक्तिज्ञानयोगाभ्युपगमः (२०) एक एवेश्वर इत्युपगमः (२१) सगुणेश्वरोपासनया तदीयलोकविशेषप्राप्तिरूपस्य मोक्षस्याभ्युपगमः (२२) तस्मिंश्च मोक्षे जीवस्य जगद्व्यापारवर्जं ईश्वरेण साकं भोगमात्रसाम्याभ्युपगमः (२३) ईश्वरस्य जीवस्य च भेदाभ्युपगमः (२४) जगतः वैकुण्ठादिलोकस्य

च सत्यत्वाभ्युपगमः (२५) जीवस्य जगत्कारणत्वानभ्युपगमः (२६) मोक्षे दुःखनिवृत्तिमात्राभ्युपगन्तृतार्किकादिमतनिरासेन सुखस्याप्यभ्युपगमः।

(२७) भगवदपरोक्षज्ञानान्मोक्षस्वीकारः (२८) जीवस्य मोक्षे स्वरूपानन्दब्रह्मानन्दानुभववर्णनम् (२९) कर्मणा मोक्षास्वीकारः (३०) ज्ञानकर्मसमुच्चयवादनिरासः (३१) भगवच्छरणागतिस्वीकारः (३२) जीवस्य जडत्वस्वीकर्तुः तार्किकादेः जडबोधात्मकत्वाभ्युपगन्तुः भाट्टस्य च निरासेन केवलचिद्रूपत्वाभ्युपगमः (३३) जीवस्यानुमेयत्वपरप्रकाश्यत्वाभ्युपगमनिरासेन प्रत्यक्षत्वस्वयंप्रकाशत्वाभ्युपगमः (३४) जीवस्यानन्दरूपत्वाभ्युपगमः (३५) जीवस्य केवलभोक्तृत्वाभ्युपगन्तृसांख्यप्रतिक्षेपेण कर्तृभोक्तृरूपत्वाभ्युपगमः (३६) जगतः प्रकृतिपरिणामत्वाभ्युपगमेन आरंभवादसंघातवादनिरासः (३७) कार्यकारणात्यन्तभेदवादितार्किकमतनिरासेन कार्यकारणानन्यत्वाभ्युपगमः (३८) स्फोटवादिवैयाकरणमतनिरासः (३९) ऐकभविकवादानभ्युपगमः।

(४०) जीवजगद्ब्रह्मणां पारमार्थिकभेदाभेदवादिभास्करादिमतप्रतिक्षेपः (४१) ब्रह्मणस्सावयवत्वपरिणामित्वाद्युपगन्तृमतनिरासः (४२) पदानां कार्यव्युत्पत्तिनियमाभ्युपगन्तृप्राभाकरमतप्रतिक्षेपेण सिद्धेऽप्यर्थे वेदप्रामाण्याभ्युपगमः (४३) प्रकृतेः स्वातन्त्र्याभ्युपगन्तृसांख्यप्रतिक्षेपेण प्रकृतेरीश्वरपारतन्त्र्याभ्युपगमः (४४) यागीयपशुहिंसाया अदोषत्वाभ्युपगमः (४५) व्यावहारिकप्रपञ्चस्य स्वाप्नवैधर्म्याभ्युपगमः (४६) जीवोत्पत्तिनिरासः (४७) मुक्तौ जीवस्य स्वरूपाविर्भाववर्णनम् (४८) पाञ्चरात्रस्य सर्वथा अप्रामाण्यानभ्युपगमेन प्रामाण्यस्वीकारः (४९) परमात्मनस्सर्ववेदप्रतिपाद्यत्वाभ्युपगमः (५०) विष्णोः ब्रह्मकोट्यन्तर्भावस्वीकारः (५१) तार्किकाभ्युपगतसमवायप्रतिक्षेपः; इत्येवमादिभिः बहुभिः मतचतुष्टयसाधारणैरंशैः इतरमतापेक्षया मध्वादिमतचतुष्टयं सामान्यतः मिथस्समरसं सन्निकृष्टं च दरीदृश्यते।

(७) मध्वभगवत्पादमतयोस्सामरस्यम् ।

अथ मतचतुष्टयस्य विशेषतः प्रत्यासत्तिमुखेन सामरस्यं प्रदर्शयामः । तत्र प्रथमतः द्वैतमतस्य अद्वैतमतस्य च विशिष्य प्रत्यासत्तिं सामरस्यं च प्रदर्शयामः—(१) आत्मनि दुःखित्वाद्यनुभवो न प्रमा, किंतु दुःखभयादेरन्तः-करणनिष्ठस्य आत्मन्यध्यासात् भ्रमरूप एव, इत्यद्वैतमत इव द्वैतमतेऽप्य-भ्युपेयते, इत्युभयोर्मतयोस्सामरस्यम् । इयांस्तु विशेषः—यत् द्वैतमते बुद्धी-न्द्रियशरीरविषयाः स्वरूपतस्सन्त एव अविद्यादिवशात् आत्मीयतया अध्यस्यन्ते, अद्वैतमते तु दुःखादिकं स्वरूपेणापि मिथ्या, इति । (२) तथा ब्रह्मणः जीवव्यावर्तकस्वभिन्नधर्मराहित्यरूपं निर्धर्मकत्वं द्वैताद्वैतो-भयमतसाधारणम् । इयान् विशेषः—यत् द्वैतमते ब्रह्मणि आनन्दादेः भेदा-भावेऽपि धर्मधर्मिभावनिर्वाहाय भेदप्रतिनिधिर्विशेषोऽङ्गीक्रियते । अद्वैतमते तु अविद्यावशात् कल्पितभेदेन धर्मधर्मिभावः, इति ।

(३) एवं मतद्वयेऽपि शारीरकशास्त्रे विचार्यस्य मुमुक्षुज्ञेयब्रह्मणः नोपास्यत्वं, अपितु तत्प्रतिबिंबस्यैवोपास्यत्वम् । (४) मतद्वयेऽपि जीवस्य ब्रह्मप्रतिबिंबत्वम् । इयान् विशेषः—यत् द्वैतमते बिंबात् प्रतिबिंबो वस्तुतो भिन्नः, अद्वैतमते काल्पनिकस्तयोर्भेदः इति । (५) जीवस्य संसारदशायां स्वरूपा-नन्दब्रह्मस्वरूपतदानन्दाद्यावारकं अनादिभावरूपमज्ञानं मायाऽविद्याप्रकृत्यादि-शब्दवाच्यं ज्ञाननिवर्त्यं मतद्वयेऽपि अभ्युपेयते । द्वैतमते तत् सत्यं अद्वैतमते अनिर्वचनीयमिति विशेषः । (६) द्वैतमतेऽपि अद्वैतमतवत् मुक्तौ जीवस्य ब्रह्मानन्दानुभव इष्यते । एतत् जीवब्रह्माभेदसूचकम् । भेदे हि अन्यानन्दस्य अन्यं प्रति अपुरुषार्थत्वं स्यात् । अन्यानन्दस्य अन्यं प्रति परोक्षत्वमेव च स्यात् नापरोक्षत्वम् ।

(७) द्वैतमतेऽपि जन्यज्ञानं मनोनिष्ठमङ्गीकृतम् । अद्वैतमतेऽपि वृत्तिरूपज्ञानं मनोनिष्ठमिष्यते । इति उभयमतसामरस्यम् । ज्ञानेच्छाकृतित्रितयं

मनोनिष्ठं आत्मनिष्ठं च इति द्विविधमिष्टं मध्वमते, इति विशेषः। (८) विष्णोर्ब्रह्मत्वं तदुपासनाङ्गीकरणं च मतद्वयेऽपि समानम्, (९) शिखा-यज्ञोपवीतत्यागरूपपारमहंस्याश्रमस्वीकारः मतद्वयेऽपि तुल्यः। (१०) शुक्ति-रूप्यादेः सद्वैलक्षण्यं मतद्वयसंमतम्। एवं सूक्ष्मेक्षिकया गवेषणे द्वैताद्वैतमतयोः विशिष्य अन्येऽपि सामरस्यप्रकाराः उपलभ्येरन्।

(८) रामानुजभगवत्पादमतयोस्सामरस्यम्।

अथ रामानुजीयविशिष्टाद्वैतमतस्य अद्वैतमतस्य च विशिष्य प्रत्यासत्तिं सामरस्यं च प्रदर्शयामः—(१) रामानुजमतेऽपि द्वैतमत इव मुक्तौ जीवस्य ब्रह्मानन्दानुभव इष्यते, एतत् अद्वैतमतसंमतजीवब्रह्माभेदसूचकं पूर्ववर्णितरीत्या इति इदमेकं सामरस्यम्। (२) बाह्यप्रकाशनिवर्त्यं बाह्यं तमः भावरूपं रामानुजमते उपगम्यते, तद्दृष्टान्तेन आन्तरज्ञानप्रकाशनिवर्त्यं आन्तरतमोरूप-मज्ञानं भावरूपं अद्वैत्यभिमतं साधयितुं शक्यते, इति दृष्टान्तांशे मतद्वय-सामरस्यम्। (३) रामानुजमते द्वैतमतादयं विशेषः—यत् जगतः ब्रह्मरूपा-भिन्ननिमित्तोपादानकत्वाङ्गीकरणं अद्वैतमत इव। इदमपि मतद्वयसामरस्यम्। (४) रामानुजमते कथंचित् विशिष्टरूपेणापि अद्वैतं वर्णितम्। न तु केवलं द्वैतं द्वैतमत इव। इदमपरं सामरस्यम्। (५) मुक्तौ तारतम्यं नास्तीति भगवत्पादमत इव रामानुजमतेऽपि इष्यते। इदमपि सामरस्यम्। परं तु अद्वैतमते परममुक्तौ तारतम्याभावः। रामानुजमते अद्वैतिभिरपरमुक्तितया अभ्युपगते स्वयं परममुक्तितया अभ्युपगते मोक्षे तारतम्याभावः इति विशेषः। (६) विष्णो-र्ब्रह्मत्वाङ्गीकारः विष्णूपासनाङ्गीकारः वैकुण्ठलोकस्थतत्प्राप्त्यङ्गीकारश्च मतद्वयसंमतः इति सामरस्यम्। (७) शुक्तिरूप्यादेः असद्वैलक्षण्याङ्गीकारः मतद्वयेऽपि समः। (८)ज्ञानयोगस्य कैवल्यरूपमोक्षप्रापकत्वमुभयसंमतम्। भक्तियोगस्य च वैकुण्ठलोके भगवता सह भोगमात्रसाम्यरूपमोक्षप्रापकत्वं उभयसंमतम्। इयान् विशेषः—यत् अद्वैतमते ज्ञानयोगप्राप्यं कैवल्यमेव परममुक्तिः। भक्तियोग-

प्राप्यः वैकुण्ठादिरूपब्रह्मलोके ब्रह्मणा सह भोगमात्रसाम्यरूपमोक्षस्तु अपरमोक्ष इति इष्यते। रामानुजमते तु एतद्वैपरीत्यम्। रामानुजमते हि परिशुद्धजीवात्म-भावनारूपज्ञानयोगेन केवलाचिदनुभवरूपैश्वर्यशब्दितभोगापेक्षया उत्तमः, चिदचिद्विशिष्टनारायणाख्यब्रह्मात्मकपत्यनुभवरूपपरमपदशब्दितपरममुक्त्यपेक्षया अवमः, पतिपरित्यक्तपत्न्याः वसनभूषणाद्यलंकृतस्वीयशरीरमात्रानुभवतुल्यः बन्धाद्विलक्षणः मुक्तिभिन्नश्च आन्तरालिकः अक्षरगतिशब्दितः कैवल्याख्या-विख्यातः केवलचिदनुभवः प्राप्यते। इयमवस्था बन्धमोक्षभिन्ना अथ वा अपरमोक्षरूपा इति इष्यते। ब्रह्मणा सह भोगसाम्यमेव भक्तियोगप्राप्यं परममोक्ष इष्यते। इत्थं मतद्वयस्यापि सामरस्यमस्ति। एवमन्येऽपि सामरस्यप्रकाराः सूक्ष्मेक्षिकया अवगन्तव्याः।

(९) श्रीकण्ठभगवत्पादमतयोस्सामरस्यम्।

अथ श्रीकण्ठाचार्यसंबन्धिशिवाद्वैतमतस्य अद्वैतमतस्य च विशिष्य प्रत्यासत्तिं सामरस्यं च प्रदर्शयामः—

यद्यपि श्रीकण्ठमते प्रायशः रामानुजमतवदेव स्थूलचिदचिद्वस्तुविशिष्टं ब्रह्म कार्यं सूक्ष्मचिदचिद्वस्तुविशिष्टं ब्रह्म कारणमिति कार्यकारणोभयावस्थब्रह्मणः विशिष्टाद्वैतरूपत्वं, ब्रह्मप्रपञ्चयोः शरीरशरीरिभावः, ब्रह्मणः सविशेषत्वं, प्रपञ्च-सत्यत्वं, जीवाणुत्वं, अर्चिरादिना मार्गेण लोकान्तरस्थपरब्रह्मप्राप्तिपूर्वकतत्साद्दश्या-वाप्तिरूपमुक्तिरित्यादिप्रमेयनिरूपणं कृतं, तथापि रामानुजमतात् श्रीकण्ठमते अद्वैतमतप्रत्यासत्त्यतिशयगमको विशेषो वर्तते।

तथा हि—रामानुजमते हि प्रकृतिरूपा जडशक्तिरेव चिदचिद्रूपप्रपञ्चात्मना परिणमते, न तु ब्रह्मणः धर्मज्ञानरूपा चिच्छक्तिः तथा परिणमते। सा च ब्रह्मणश्चिच्छक्तिः ब्रह्मणस्सकाशात् भिन्ना ब्रह्मणो गुणगणात्मिका च। ब्रह्म-तदीयचिच्छक्तिभ्यां भिन्ना जडभिन्ना च शुद्धसत्त्वशब्दिता नित्यविभूतिः ब्रह्मणः अनन्तविष्वक्सेनगरुडादीनां नित्यानां मुक्तानाञ्च भोग्यभोगोपकरणभोगस्थानशरी-

रादिरूपविविधपदार्थाकारा भवति। ब्रह्ममहिषी महालक्ष्मीस्तु ब्रह्मतदीयचिच्छक्ति-नित्यविभूतिभ्यो भिन्ना स्वतन्त्रचेतनान्तररूपा जीवकोट्यन्तर्गता, तथापि विभुत्वा-दणुस्वरूपजीवान्तरविलक्षणा, अथ वा विभुत्वादीश्वरपारतन्त्र्याच्च पतिपुत्रव्यावृत्त-पत्नीन्यायेन जीवेश्वरविलक्षणा, अथ वा नित्यलीलाख्यविभूतिद्वयशेषित्वादिमात्रेण भगवत्तुल्यत्वात् ईश्वरकोट्यन्तर्गता स्वस्वेतरसर्वशेषिभगवच्छेषभूता जगत्कारण-त्वादिब्रह्मलक्षणशून्या च। महालक्ष्म्याः ब्रह्मशक्तित्वादिवादाः पत्नीत्वादिरूपेण ब्रह्मविशेषणत्वाभिप्रायाः। न तु महालक्ष्म्याः ब्रह्मत्वं वा तच्छक्तिरूपत्वं वा, इत्यभ्युपगम्यते।

श्रीकण्ठमते तु न तथाभ्युपगम्यते। किं तु सकलजगत्कर्तुः परमेश्वरस्य धर्मज्ञानरूपा चिच्छक्तिरेव केनचिदंशेन प्रथमं नारायणात्मना परिणता सती तद्द्वारा पश्चात् चिदचिद्रूपप्रपञ्चात्मना परिणमते। अत एव नारायणस्योपादा-नत्वव्यवहारः श्रुतिषु। अचित्प्रपञ्चस्य स्वरूपान्यथाभावरूपा उत्पत्तिः, चित्प्रपञ्चस्य तु नारायणांशभूतस्य धर्मज्ञानसंकोचविकासरूपैव उत्पत्तिः, न तु स्वरूपान्यथा-भावः, चित्प्रपञ्चस्य मुक्तिभाक्त्वेन नित्यत्वात्। सा चिच्छक्तिरेव परब्रह्मण-श्शिवस्य ज्ञानेच्छाकृतिबलतेजःप्रभृतिगुणरूपेण, शरीरेन्द्रियमनःप्राणरूपेण, विविधभोग्यभोगस्थानभोगोपकरणरूपेण सह भोक्तुः दिव्यमहिषीरूपेण च परमेश्वरमासेवते। स्वयमपि ज्ञानेच्छादिरूपैरुक्तैस्सर्वैरप्युपेता नारायणाख्यपुरुष-रूपेण दिव्यमहिषीयुक्ता च भवति। उक्तं चाभियुक्तैः—

'शक्तिश्शरीरमधिदैवतमन्तरात्मा ज्ञानं क्रिया करणमासनजालमिच्छा।
ऐश्वर्यमावरणमायतनानि च त्वं किं तन्न यद्भवसि देवि शशाङ्कमौलेः॥'

'योऽयं चकास्ति गगनार्णवरत्नमिन्दुः योऽयं सुरासुरगुरुः पुरुषः पुराणः।
यद्वाममर्धमिदमन्तकसूदनस्य देवि त्वमेव तदिति प्रतिपादयन्ति॥'

'एकैव शक्तिः परमेश्वरस्य भिन्ना चतुर्धा विनियोगकाले।
भोगे भवानी पुरुषेषु विष्णुः कोपे तु काली समरे च दुर्गा॥' इति।

श्रीमदप्पय्यदीक्षितैश्च शैवचिच्छक्तिनिरूपणपरे आनन्दलहरीग्रन्थे सर्वमिदमुक्तम्।

'शंभोर्ज्ञानक्रियेच्छाबलकरणमनश्शान्तितेजश्शरीर-
स्वर्लोकागारदिव्यासनवरमहिषीभोग्यवर्गादिरूपा।
सर्वैरेतैरुपेता स्वयमपि च परब्रह्मणस्तस्य शक्तिः
सर्वाश्चर्यैकभूमिः मुनिभिरभिनुता वेदतन्त्राभियुक्तैः॥' इति।

तैरेव हरिहरगौरीरूपरत्नत्रयनिरूपिकायां रत्नत्रयपरीक्षायामप्युक्तम्—'धर्मः पुंरूपमाप्त्वा सकलजगदुपादानभावं बिभर्ति' इति, 'यश्चोपादानभूतः पर इह पुरुषः सैष नारायणोक्त्या ख्यातः' इति, 'तस्यैवाद्यस्य पुंसः परिणतिरखिलोऽप्यम्बरादिर्विकारः तस्यैवांशो विरिञ्चावधिरिह सकलोऽप्येष संसारिवर्गः' इति च।

ब्रह्मणश्च सकलजगत्कर्तृभूतस्य निर्विकारत्वश्रुतिविरोधेन न साक्षादुपादानत्वम्। अपि तु स्वापृथक्सिद्धचिच्छक्तितदंशनारायणद्वारकमित्यभ्युपगम्यते। एवं चिदचिद्रूपप्रपञ्चपरिणामित्वेन चिदचिद्रूपप्रपञ्चाभिन्नतया उक्ता च चिच्छक्तिः ब्रह्माभिन्नत्वेनापि श्रीकण्ठाचार्यैः भाष्ये बहुस्थलेषु उद्घोषिता। नैतदौपचारिकतया नयनमर्हति। तात्पर्येण पौनःपुन्येन ब्रह्मचिच्छक्त्योरभेदस्य तत्र वर्णनात्।

इत्थं रामानुजमतापेक्षया महतो विशेषस्य अद्वैतमतप्रत्यासत्त्यतिशयगमकस्य श्रीकण्ठमते विद्यमानत्वादेव, निरुक्तविशेषमवलम्ब्यैव श्रीमद्दीक्षितेन्द्रैः शिवाद्वैतनिर्णयाख्यग्रन्थे—(१) 'ब्रह्मचिच्छक्तेः सकलचेतनाचेतनप्रपञ्चाकारत्वं, (२) तस्या एव ब्रह्मस्वरूपत्वं, (३) तदीयसकलगुणगणरूपत्वं, (४) ब्रह्मणो निर्विकारत्वमित्यर्थचतुष्टयं श्रीकण्ठाचार्यैरभ्युपगतं, निर्गुणं निष्प्रपञ्चं जीवाभिन्नं शुद्धाद्वैतरूपं ब्रह्मेति तेषां परमसिद्धान्तः इत्यमुमर्थं दृढमवगमयत्येव। तथा हि, चिच्छक्तेः ब्रह्माभेदे तस्या एव तदीयसकलगुणगणात्मत्वे च ब्रह्मणः स्वभिन्ना गुणा न सन्ति, किं तु स्वयमेव कल्पितभेदेन गुणवदप्यवभासते, वस्तुतो

निर्गुणमेव ब्रह्म इत्येतत् तावत्सिद्ध्यति । नह्यभेदे मुख्यो गुणगुणिभावः उपपद्यते, न चाभेद इव मुख्यगुणगुणिभावोपपादको भेदोऽपि आचार्यैरङ्गीकृत इति वक्तुं शक्यते, आरम्भणाधिकरणभाष्यादिषु विरोधेन भेदाभेदपक्षस्य प्रतिक्षिप्तत्वात् । न च मध्वमत इव आचार्याणां मते गुणगुणिनोर्भेदाभावेऽपि भेदप्रतिनिधिर्विशेषोऽभ्युपगतोऽस्ति । तस्मात् गुणविषये तावत् 'अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते' इति पञ्चपादिकोक्तपक्ष एवाभिमत इत्येतत् सुदृढमेव ।

तथा सकलप्रपञ्चाकारायाः चिच्छक्तेः ब्रह्माभेदाभ्युपगमेन वियदादिप्रपञ्चः तद्विवर्त इति सिद्ध्यति । अन्यथा वियदादेरनित्यस्य तत्परिणामत्वाभ्युपगमे तदभिन्नस्य ब्रह्मणः निर्विकारत्वाभ्युपगमविरोधापत्तेः । तस्मात् संक्षेपशारीरकोक्तरीत्या भाष्ये परिणामवादावलम्बनं व्यवहारदृष्टौ कर्मोपासनादिनिर्वाहार्थं तत्त्वदृष्टौ तत्प्रतिषेधापेक्षिततत्प्रसक्त्यर्थं चेति ब्रह्मणो निष्प्रपञ्चत्वपक्ष एवाभिमतः इत्यपि सुदृढम् ।

ब्रह्माभिन्नायाः चिच्छक्तेः सकलाचेतनप्रपञ्चाकारत्ववत् सकलचेतनप्रपञ्चाकारत्वस्याप्युक्तत्वेऽपि, चेतनप्रपञ्चस्य वियदादिवत् तद्विवर्तत्वं न सिद्ध्यति । तथा सति तस्य तत्त्वज्ञानान्निवृत्त्या मुक्तिफलभाक्त्वाभावप्रसङ्गात् । नित्यस्य तस्य ब्रह्माभेदेऽपि ब्रह्मनिर्विकारत्वविरोधाप्रसङ्गाच्च । तस्मात् निर्गुणं निष्प्रपञ्चं जीवाभिन्नं शुद्धाद्वैतरूपं ब्रह्मेति आचार्याणामभिमतमित्येतत् सुदृढमेव' इत्यादिग्रन्थेन श्रीकण्ठमतस्याद्वैततात्पर्यकत्वमप्याविष्कृतम् ।

(५) एवमेव सन् घटः इत्यादिप्रत्यक्षस्य मतान्तर इव प्रपञ्चगतसत्यत्वविषयकत्वमनभ्युपगम्योपादानभूतसद्रूपब्रह्मतादात्म्यविषयकत्वं श्रीकण्ठाचार्याभ्युपगतं प्रपञ्चमिथ्यात्ववाद्यद्वैतिनामनुकूलम् । (६) एवं घटः स्फुरतीत्यादिजीवधीष्वनुभूयमानस्य स्फुरणस्य ब्रह्मस्फुरणरूपत्वम्, (७) अहं सुखीति जीवैरनुभूयमानस्य सुखस्य ब्रह्मानन्दरूपपरशक्त्यंशत्वञ्च श्रीकण्ठाचार्याभ्युपगतमर्थात्

जीवब्रह्माभेदसूचकं सत् अद्वैतिनामनुकूलम् । जीवब्रह्मणोर्भेदे अन्यज्ञानेन अन्येषां स्फुरणवत्त्वस्य अन्यानन्देन अन्येषां सुखित्वस्य चायोगात् ।

(८) एवं "अनियमस्सर्वेषामविरोधः शब्दानुमानाभ्याम्" इत्यधिकरणे प्रथमं ब्रह्मोपासनासामान्येऽर्चिरादिगतिं व्यवस्थाप्यानन्तरं "केचिदाहुरनियमस्सर्वेषामुपासकानामर्चिरादिगतौ नियमाभावः, तथा सति श्रुतिस्मृतिभ्यामविरोधः इति" इति मतान्तरमुपन्यस्य 'तत्रापि न दोषः निरन्वयोपासकानां तदपेक्षाभावात्' इति तस्यापि सौत्रयोजनान्तरस्य अद्वैतिसम्मतस्य अदुष्टत्वमुपपादितम् । तथा 'तदाऽऽपीतेः संसारव्यपदेशात्' इत्यधिकरणावसाने, 'केचिन्निरन्वयोपासकानामिह शरीरपात एव मुक्तिरिति अर्चिरादिगतिमनियतामाहुः' इत्युपन्यस्तम् । एवं 'अर्चिरादिना तत्प्रथिते'रित्यधिकरणावसानेऽपि "निरन्वयोपासकानां नार्चिरादिगतिरिति केचित्' इति कथितम् । एवं यत्र यत्र अधिकरणे ब्रह्मविदः गतेरुत्क्रान्तेर्वा व्यवस्थापनं क्रियते तत्र सर्वत्रापि तस्य तस्याधिकरणस्य सकलब्रह्मवित्साधारण्यशङ्कापरिहारार्थमस्य मतस्योपन्यासात्, अनियमाधिकरणे स्वयमपि अस्योपपादनाच्च, अद्वैत्यभिमतायां निर्गुणज्ञानिनामिहैव मुक्तौ श्रीकण्ठाचार्याणामभिमतिरवगम्यते । केचिदित्युपन्यासस्य स्वयमिदानीं सगुणविद्यानिरूपणनिष्ठ एव न तु भगवत्पादवत् निर्गुणविद्यानिरूपणनिष्ठ इति द्योतनार्थत्वमेव वक्तव्यं, न तु स्वानभिमतिद्योतनार्थत्वम् । स्वानभिमतौ तन्मतस्योपपादनायोगात् ।

(९) एवमुपासनस्य जीवब्रह्माभेदगोचरत्वोपवर्णनमप्यद्वैतिनामनुकूलम् । इदं च प्रमेयजातं श्रीमद्दीक्षितैरेव शिवाद्वैतनिर्णये आनन्दलहर्यांञ्च स्फुटं प्रत्यपादि । आनन्दलहरीस्थौ च पूर्वोक्तविषयसंग्राहकौ श्लोकाविमौ ।

"उक्ता खल्वत्र मुक्तिः गतिमुपरि विना निर्गुणोपासकानां
जीवाभेदावलंबा सगुणपरशिवोपासनाप्यत्र भाष्ये ।
सत्ताप्रत्यक्षबुद्धेर्जगति च विषयो वर्णितस्सत्यतान्यः
शुद्धं ब्रह्माद्वितीयं मतमिति बहुधाऽऽविष्कृतं तावदेवम् ॥"

"चिच्छक्तिं ब्रह्मणो यत् सकलचिदचिदाकारशालिस्वरूपां
यत्तां तस्य स्वरूपं यदपि गुणगणं यच्च तन्निर्विकारम् ।
आचार्याः प्रोचुरेतैः दृढमधिगमितं निर्विशेषं तदिष्टं
जीवास्तेनैक्यभाजो वियदनिलमुखाः तद्विवर्ता इतीदम् ॥" इति ।

(१०) भगवत्पादमत इव श्रीकण्ठमतेऽपि भावरूपाज्ञानं अभ्युपगम्यते। परं तु आणवमलनाम्ना तस्य श्रीकण्ठमते व्यवहारः । शिवार्कमणिदीपिकायां जिज्ञासाधिकरणे—'संसारिणां सर्वविषयत्वयोग्यचिच्छक्तिरूपनित्यसिद्धज्ञाना-वरणभूताः मलद्रव्यशक्तिविशेषा एव तत्तद्विषयाज्ञानानि इति अज्ञानानामभावत्व-कथापि वृथैव' इत्युक्तम् । (११) जीवस्य ब्रह्मानन्दानुभवः जीवब्रह्माभेदगमकः श्रीकण्ठमतेऽपि इष्यते । (१२) ब्रह्मणः जगत् प्रति अभिन्ननिमित्तोपादान-त्वाभ्युपगमः मतद्वयतुल्यः । (१३) श्रीकण्ठमतेऽपि अद्वैतं विशिष्टरूपेण कथंचित् समर्थ्यते । (१४) पूर्वोत्तरमीमांसयोः ऐकशास्त्र्यसमर्थने रामानुजस्येव श्रीकण्ठस्य नाग्रहः। प्रथमतः ऐकशास्त्र्यं समर्थयित्वा, 'अथ वा' इति पक्षान्तरे तदनङ्गीकारात् ऐकशास्त्र्यसमर्थनं प्रौढिवादेनेत्याशयाविष्कारात्। भगवत्पादमतेऽपि प्रौढ्या ऐकशास्त्र्याभ्युपगमात् । व्यक्तमिदं परिमलादौ । शिवार्कमणिदीपिकायां श्रीकण्ठभाष्ये अथवेति पक्षान्तरारंभे, 'किं ऐकशास्त्र्योप-पादनव्यसनेनेत्यरुचिं मनसि निधायाह—अथवेति' इत्येवावतारिका दत्ता ।

(१५) प्रथमसूत्रघटकातश्शब्दार्थविवरणावसरे श्रीकण्ठभाष्ये 'यतो-ऽधीतवेदेन धर्मो विचारितः, अतः तदनुष्ठानसंपन्नचित्तशुद्धिना तत्कालसंपन्न-विवेकादिगुणसहकृतपरमभक्तिसंभावितेनानेन ब्रह्मापि निरतिशयनिश्श्रेयसकरं विचारणीयमिति' इत्यत्र शिवार्कमणिदीपिकारीत्या आदिशब्देन वैराग्यादेरुक्त्या साधनचतुष्टयसंपन्नस्य ब्रह्मविचाराधिकारित्वं भगवत्पादाभ्युपगतमादृतम्, अतोऽपि मतद्वयसामरस्यम्। शिवार्कमणिदीपिकापरामर्शे स्फुटीकृतमिदं भवेत् । 'शमद-माद्युपेतस्स्यात्' इत्यस्मिन्नपि सूत्रे स्फुटमिदम् । (१६) 'शास्त्रयोनित्वात्' इति

सूत्रस्यार्थद्वयमपि भगवत्पादीयं श्रीकण्ठसंमतम् । इतरभाष्येषु अर्थद्वयं न वर्णितम् । अनेनापि मतद्वयप्रत्यासत्तिः ।

(१७) यागीयपशुहिंसायाः हिंसात्वमभ्युपगम्यैव अशुद्धत्वं निराकृतं श्रीकण्ठभाष्ये भगवत्पादमतवत् । न तु रामानुजमतवत् हिंसात्वमेवापलपितं श्रीकण्ठेन । पशुहिंसाया अहिंसात्वमौपचारिकमेव न मुख्यं श्रीकण्ठमते । (१८) शिवोपासनाङ्गीकारः, शिवस्य ब्रह्मत्वाङ्गीकारः, गौर्या अपि ब्रह्मत्वाङ्गीकारश्च मतद्वयसमानः । (१९) 'सन्ध्ये सृष्टिराह हि' इत्यधिकरणे शिवार्कमणिदीपिकायां श्रीमद्दीक्षितोक्तरीत्या श्रीकण्ठाचार्याणां मतान्तर इव स्वप्नदृश्यरथादीनां सत्यत्वमिथ्यात्वपक्षयोः अभिनिवेशं विना स्वप्नव्यवहारः न जीवसंकल्पकृतः किं तु परमेश्वरसंकल्पमात्राधीनः इत्येतावन्मात्रे अभिनिवेशोऽपि स्वप्नसत्यत्ववादिमतापेक्षया श्रीकण्ठमतस्य स्वप्नमिथ्यात्ववाद्यद्वैतमतसंनिकृष्टतां सूचयति इत्यतोऽपि मतद्वयसामरस्यम् । एवमेव अस्मिन् मतद्वये अन्येऽपि सामरस्यप्रकारा ऊहनीयाः ।

(१०) मतान्तरापेक्षया मध्वादिमतेषु विशेषः ।

इयता प्रबन्धेन च मध्वादिमतत्रयस्य भगवत्पादमतं प्रति सामान्यतो विशेषतश्च प्रत्यासन्नत्वमुपवर्णितम् । यद्यपि, मध्वादिमतेषु जीवस्याणुत्वं साधितं नैयायिकादिमते तु विभुत्वं साधितम् , भगवत्पादमतेऽपि जीवस्य ब्रह्माभिन्नत्वात् स्वभावतः विभुत्वमेवाङ्गीकृतम् । एवं नैयायिकमते भगवत्पादमत इव निर्विकल्पकज्ञानमङ्गीकृतं, रामानुजमते सविकल्पकविशेषरूपमेव प्रथमपिण्डज्ञानं निर्विकल्पकस्थानेऽभिषिक्तम् । एवमादिहेतुभिः नैयायिकादिमतानामपि मध्वादिमतत्रयापेक्षया भगवत्पादमतप्रत्यासत्तिः वक्तुं उचितेव आपाततो भाति, तथापि नैयायिकादिमतापेक्षया मध्वादिमते स्वतः प्रामाण्याभ्युपगमजीवचिदानन्दरूपत्वाभ्युपगममोक्षकालीनसुखाविर्भावाभ्युपगमसत्कार्यवादकार्यकारणानन्यत्वाभ्युपगमप्रकृतिपरिणामवादश्रुत्यवष्टम्भेन मूलकारणव्यवस्थापनादिभिः पूर्वोक्तैः बहुभि-

रंशैः भगवत्पादमतप्रत्यासत्त्यतिशयस्य सत्त्वेन मध्वादिमतत्रयमेव भगवत्पादमत-प्रत्यासन्नत्वेन दीक्षितचरणैर्वर्णितमित्यवगन्तव्यम् ॥

यद्यपि साक्षात् ब्रह्मपरिणामित्ववादिनां प्राचीनवृत्तिकाराधुनिकभास्कर-प्रभृतीनां मतं भेदाभेदगोचरं अद्वैतमतसंनिकृष्टमस्ति, तथापि श्रीकण्ठाचार्यस्य चिच्छक्तिद्वारकब्रह्मपरिणामवाद एव उक्तरीत्या विवर्तवादपर्यवसायी इतरमता-पेक्षया अतिशयेन अद्वैतमतस्य संनिकृष्ट इति वृत्तिकारादिमतपरित्यागेन श्रीकण्ठमतमेव चतुर्मतमध्ये योजितमिति बोध्यम् ।

(११) तुरीयो विषयः मध्वादिमतचतुष्टयस्य क्रमिकभूमिकात्वम् ।

अथ तुरीयं मध्वादिमतचतुष्टयस्य मुक्तिहेतुक्रमिकभूमिकाचतुष्टयरूपत्वं तदीयक्रमपाठसूचितं निरूप्यते । भगवत्पादानां हि मते उपनिषत्सु उपासना-काण्डं ज्ञानकाण्डश्चेति काण्डद्वयमन्तर्गतं वर्तते, कर्मकाण्डन्तु तत्र नान्तर्गतम् । उपासनाकाण्डे च विधीयमानमुपासनं मानसक्रियारूपं चोदनातन्त्रं पुरुषतन्त्रं क्रियायां विकल्पसंभवात् कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं न प्रमाणवस्तुपरतन्त्रम् । ज्ञानकाण्डोदितज्ञानं तु अक्रियारूपं प्रमाणवस्तुपरतन्त्रं वस्तुनि विकल्पासंभवात् कर्तुमकर्तुमन्यथा वा कर्तुमशक्यमत एव न चोदनातन्त्रम्, नापि पुरुषतन्त्रम् । किंचोपासने विद्यमानस्यापि वस्तुनः अविषयीभावः अविद्यमानस्यापि विषयी-भावश्च, तत्वज्ञाने तु विद्यमानस्यैव विषयीभावः न त्वविद्यमानस्य कस्याप्यं-शस्य विषयीभावः, 'सर्वत्र हि शास्त्रप्रापिता एव धर्मा उपास्याः न विद्यमाना अप्यशास्त्रीयाः' इति छान्दोग्यभाष्यवचनात्, 'न खलु यथावस्त्वेव उपासित-व्यमिति कश्चिन्नियमोऽस्ति, किंतु यथावचनमेवोपासितव्यमित्येतावानेव नियमः' इति, 'न हि वस्तूनां स्वभावानुसारेण किञ्चिदुपासनं प्रवर्तते, किं तु वचनानु-सारेण.' इति च ऐतरेयारण्यकभाष्ये सायणाचार्यवचनात् ।

उपासनज्ञानयोः वैलक्षण्यञ्च शारीरकभाष्य एव समन्वयाधिकरणादौ भगवत्पादैः स्फुटीकृतम् । तत्त्वज्ञानोपासनयोश्च पूर्वोक्तवस्तुतन्त्रत्वपुरुषतन्त्रत्व-

रूपवैलक्षण्यादेव ज्ञानस्य नानाविधत्वासंभवात् ज्ञानमार्गस्य एकविधत्वम्, उपासनस्य नानाविधत्वसंभवात् उपासनामार्गस्य बहुविधत्वम्। अत एव च भगवत्पादानां ज्ञानमार्गरूपैकविधाद्वैतमतस्थापकत्वमुपासनामार्गरूपनानाविधशैव-शाक्तस्कान्दगाणपतवैष्णवसौररूपषण्मतस्थापकत्वञ्च। एवमुपासनस्य तत्वज्ञानान्महतो विशेषस्य सद्भावेऽपि—

'निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः।
ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः॥

वशीकृते मनस्येषां सगुणब्रह्मशीलनात्।
तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनम्॥'

इति कल्पतरुवचनाद्युक्तरीत्या ज्ञानं प्रति अन्तरङ्गसाधनत्वात्, ज्ञानोपासनयोः रहस्यत्वमनोवृत्तित्वाभ्यां साम्याच्च हेतोः ज्ञाननिरूपणैदंपर्यप्रवृत्तायामपि उपनिषदि ज्ञानेन साकं ज्ञाननिरूपणप्रसङ्गेनोपासनानामपि बहुविधानां कीर्तनम्, तदनुसारेणोपनिषद्विवरणरूपब्रह्ममीमांसायामपि उभयोर्निर्णयश्च, न तु ज्ञानबहिरङ्गसाधनभूतयज्ञादिकर्मकलापवत् उपासनानां वेदपूर्वभागे कीर्तनं कर्ममीमांसायां निर्णयश्च।

तत्रापि यथा चतुर्ष्वपि वेदेषु सर्वप्राण्यनुग्रहार्थं ब्रह्मभावावाप्तिरूपमहापुरुषार्थप्रतिपादनैदंपर्येणैव प्रवृत्तेषु तदुपयोग्यन्तःकरणशुद्धिजनककर्मनिरूपणार्थ एव भूयान्प्रपञ्चः, तदधिकारिबाहुल्यात् निरूपणीयकर्मबाहुल्याच्च। अत एव च तन्निर्णयाय प्रवृत्ता धर्ममीमांसापि प्रतिपाद्यबाहुल्येन ग्रन्थतो महती सहस्राधिकरणोपेता। ब्रह्मनिरूपणार्थो वेदान्तभागस्तु अधिकारिबाहुल्याभावान्निरूपणीयबाहुल्याभावाच्च स्वल्पः, अत एव च ब्रह्ममीमांसापि प्रतिपाद्याल्पत्वेन ग्रन्थतो लघ्वी एकाधिकनवत्युत्तरशताधिकरणोपेता। तथैव वेदान्तभागे, तदर्थाविष्कारपरायां ब्रह्ममीमांसायां, भगवत्पादीये तद्भाष्ये च, निर्विशेषब्रह्मभावावाप्त्यर्थं तन्निदिध्यासनापेक्षितचित्तस्थैर्याद्युपयोगिसगुणब्रह्मोपासनप्रसङ्ग एव भूयानधिकारि-

बाहुल्यान्निरूपणीयनानाविधोपासनतदुपयोगिगुणादिबाहुल्याच्च। निर्विशेषब्रह्म-स्वरूपज्ञाननिरूपणभागस्तु अधिकारिबाहुल्याभावात् निरूपणीयबाहुल्याभावाच्च स्वल्प एव।

एवं ज्ञानकाण्डस्य स्वल्पत्वेऽपि तत्रापि तत्सारभूतस्य महावाक्यस्य स्वल्पतरत्वेऽपि च, प्राधान्यादुपनिषदिति, किं विशेषितेन? वेद इति च पदं महावाक्यस्यैव मुख्यवृत्त्या बोधकमन्यस्य गौण्या वृत्त्यैव बोधकम्। तदुक्तं संक्षेपशारीरके—

'उपनिषदिति वेद इत्यपीदं समभिवदन्ति महावचो महान्तः' इति,
'अपरमखिलमस्यैवाङ्गभूतत्वहेतोरिह समभिनिविष्टं तद्गिरो वाच्यमासीत्'

इति,

'सर्वत्रैव महागिरामुपनिषच्छब्दो भवेद्ग्राहको
वेदश्चायमतोऽन्यदस्य निकटं तेनात्र वेदादिगीः' इति,
'उपनिषद्वचसा परमात्मगीः सहजशक्तिवशेन निगद्यते।
तदुपचर्य महागिरि वर्तते निकटभावमपेक्ष्य तु मुख्यगीः॥
उपनिषद्वचनाभिहितात्मधीनिकटवर्तिमहागिरि मुख्यवत्।
उपनिषद्वचनं तदवान्तरे वचसि गौणवदत्र विवक्ष्यते॥' इति च।

तथा च वेदोपनिषत्पदमुख्यार्थभूतसारतममहावाक्यगर्भितज्ञानकाण्ड-विवरणात्मकं तत्त्वमस्यादिमहावाक्यजनितप्रत्यगभिन्नब्रह्मगोचरनिर्विकल्पाखण्ड-साक्षात्कारेणैहैवाज्ञानतत्कार्यात्मककृत्स्नबन्धनिवृत्त्युपलक्षितपरिपूर्णब्रह्मानन्दाविर्भा-वरूपं, 'न तस्य प्राणा उत्क्रामन्ति' 'ब्रह्मैव सन् ब्रह्माप्येति' 'अत्र ब्रह्म समश्नुते' इत्यादिश्रुतिवशेनार्चिरादिगत्यनपेक्षं, तत्तत्कर्मोपासनादिविविधसाधनकलापैः तत्तद्देशप्राप्तिपूर्वकं लभ्यं सर्वमपि फलजातं वापीकूपतटाकसरिदाद्युदपानफल-तुल्यं स्वात्मन्यन्तर्भावयत् सर्वतस्संप्लुतोदकसमुद्रायमाणज्ञानफलं कैवल्यशब्दितं परममोक्षमभिव्यञ्जयत् भगवत्पादोद्घाटितं शुद्धाद्वैतमतं तत्प्रतिपादितस्य मोक्ष-

साधनीभूतजीवब्रह्मैक्यज्ञानस्य मुक्त्यव्यवहितचरमभूमिकारूपत्वेन श्रीमद्दीक्षितचरणैः चतुर्मतसारसंग्रहाख्यग्रन्थेऽन्ते सन्निवेशितम् ।

मध्वरामानुजश्रीकण्ठमतानि तु मुक्तिहेतुज्ञानसाधनीभूतवैधोपासनाबोधकोपासनाकाण्डविवरणरूपत्वेन सामीप्यसारूप्यसायुज्यरूपापरमोक्षाभिव्यञ्जकत्वेन च पूर्वभूमिकात्वात्पूर्वं सन्निवेशितानि । उपासनप्रतिपादकत्वादेव मध्वादिमतत्रयस्य 'आनन्दतीर्थमुनिलक्ष्मणदेशिकेन्द्रश्रीकण्ठयोगिपदवी'रिति समस्य निर्देशः, 'आचार्यपादसरणि'मिति ज्ञानप्रतिपादकाद्वैतमतस्य पार्थक्येन निर्देशश्च दीक्षितचरणैः कृत इति सूक्ष्मेक्षिकया अवगन्तव्यम् ।

(१२) भूमिकाक्रमे प्रथमं कारणम् ।

तत्रापि ब्रह्मणः स्वस्वामिभावेनोपासना, अहंग्रहोपासना चेति ब्रह्मोपासनायां भूमिकाद्वितयमस्ति । तत्र स्वस्वामिभावेनोपासना प्रथमभूमिका, अहंग्रहोपासना च द्वितीयभूमिका । अहंग्रहोपासनायाञ्च भगवत्पादाभिमताद्वैतमतप्रतिपादिततत्वज्ञान इव उपास्योपासकयोर्जीवब्रह्मणोरभेदो भाति । अहंत्वेन स्वात्माभिन्नत्वेन ब्रह्मणो ग्रहो यत्रेति व्युत्पत्तेः । स्वस्वामिभावोपासनायान्तु नाभेदो भासते, अपि तु भेद एव । स्वस्वामिभावोपासनायाः अहंग्रहोपासनातः पूर्वभूमिकात्वञ्च—

'तस्यैवाहं ममैवासौ स एवाहमिति त्रिधा ।
भगवच्छरणत्वं स्यात् साधनाभ्यासपाकतः ॥'

इत्यादिवचनैः क्रमेण तस्यैवाहमिति ममैवासाविति च द्विविधस्वस्वामिभावोपासनाभ्यासपरिपाकेनाहंग्रहोपासनसिद्धिबोधनादवगम्यते । स्वस्वामिभावोपासनायामपि पृथक्सिद्धस्वस्वामिभावोपासना अपृथक्सिद्धस्वस्वामिभावोपासना चेति भूमिकाद्वितयमस्ति । तत्रापि पूर्वोक्तन्यायेन पूर्वभूमिकाभ्यासपरिपाकेनोत्तरभूमिकासिद्धिरवगन्तव्या । पृथक्सिद्धस्वस्वामिभावोपासना प्रथमभूमिका,

अपृथक्सिद्धस्वस्वामिभावोपासना च द्वितीयभूमिका, प्रथमा मध्वमते, द्वितीया रामानुजमते ।

विशिष्टाद्वैतमते हि 'यस्य पृथिवी शरीरम्' 'यस्यात्मा शरीरम्' इत्याद्यन्तर्यामिब्राह्मणवाक्यानुसारेण चिदचिद्रूपयोर्जीवजगतोर्ब्रह्मणश्च शरीरशरीरिभावः अभ्युपगम्यते । शरीरशरीरिणोश्च प्रभाप्रदीपगुणगुणिक्रियाक्रियावज्जातिव्यक्त्यवयवावयविनामिवापृथक्सिद्धिरिष्यते, तथा च जीवस्य ब्रह्मशरीरत्वात् ब्रह्मणा साकमपृथक्सिद्धिः । जीवब्रह्मणोश्चापृथक्सिद्धत्वेऽपि नाभेदः, नापि भेदाभेदः, अपि तु राजभृत्ययोरिव स्वस्वामिभावेनात्यन्तभेद एव । एवञ्च जीवब्रह्मणोः शरीरशरीरिभावानुसन्धानपूर्वकं शेषशेषिभावापरपर्यायस्वस्वामिभावेनोपासना अपृथक्सिद्धस्वस्वामिभावोपासनेत्युच्यते । राजभृत्ययोरिव जीवब्रह्मणोरपि शरीरशरीरिभावानभ्युपगमेनापृथक्सिद्ध्यनङ्गीकारे शरीरशरीरिभावानुसन्धानरहितस्वस्वामिभावोपासना पृथक्सिद्धस्वस्वामिभावोपासनेत्युच्यते । उभयविधस्वस्वामिभावोपासनयोरपि अभेदानवगाहनात् अभेदावगाह्यहंग्रहोपासनातः पूर्वभूमिकात्वमेव ।

उभयविधस्वस्वामिभावोपासनयोरपि मध्ये जीवब्रह्मणोरत्यन्तभेदसत्त्वेऽपि अभेदानवगाहनेऽपि च, शरीरशरीरिभावमात्रेण शरीरवाचकानां शरीरिपर्यन्तत्वनियमात् 'अहं ब्राह्मणः अहं मनुष्य' इत्यादिशरीरात्मसामानाधिकरण्यव्यपदेशवत् "अहं ब्रह्म" इति जीवब्रह्मसामानाधिकरण्यव्यपदेशस्य जीवब्रह्माभेदबोधकमत इव संभवादपृथक्सिद्धस्वस्वामिभावोपासनायाः द्वितीयभूमिकात्वम् । पृथक्सिद्धस्वस्वामिभावोपासनायास्तु जीवब्रह्मणोरशरीरशरीरिभावाभावेन राजा भृत्य इत्यादिवदहं ब्रह्मेति सामानाधिकरण्यव्यपदेशासंभवात् प्रथमभूमिकात्वमिति मन्तव्यम् । अत एव पृथक्सिद्धस्वस्वामिभाववर्णनपरमध्वमते तत्त्वमसीत्यत्र अतत्त्वमसीति छेदस्य, तदिति पदस्य लुप्ततृतीयादिविभक्तिकत्वस्य वा आश्रयणम् । तथा च मध्वमते जीवब्रह्मणोरशरीरशरीरिभावानङ्गीकारेण पृथक्सिद्धस्वस्वामिभावोपासनाया

वर्णनात् मध्वमतस्य प्रथमभूमिकात्वम् । रामानुजमते जीवब्रह्मणोश्शरीरशरीरि-भावाङ्गीकारेणापृथक्सिद्धस्वस्वामिभावोपासनाया वर्णनात् रामानुजमतस्य द्वितीय-भूमिकात्वम् । श्रीकण्ठमते जीवब्रह्मणोरभेदावगाह्यहंग्रहोपासनवर्णनात् श्रीकण्ठ-मतस्य तृतीयभूमिकात्वमवसेयम् ।

यद्यपि रामानुजभाष्येऽपि दहराद्युपासना अहंग्रहोपासनाशब्देनैव व्यव-हृता, अहमिति स्वात्मतया अनुसन्धानमिति च व्यवहृतम्, तथापि तत्र स्वात्मतयेत्यस्य स्वशरीरित्वेनेत्येवार्थः । तथा चाहंत्वेन-स्वशरीरित्वेन ब्रह्मणो ग्रहः यत्रेति व्युत्पत्त्या स्वस्वामिभावोपासनाविशेषस्यैवाहंग्रहोपासनाशब्देन व्यवहारः, न तु तत्र स्वाभिन्नत्वेनापि परमात्मनो ग्रह इति भ्रमितव्यम् । यद्यपि च श्रीकण्ठभाष्येऽपि रामानुजभाष्य इव अंशाधिकरणादौ शास्त्रदृष्टिसूत्रे च दहराद्यहं-ग्रहोपासनेषु शरीशरीरिभावमूलकापृथक्सिद्धिविषयत्वमभ्युपगतम्, तथापि श्री-कण्ठभाष्य एव 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इत्यहंग्रहाधिकरणादौ शास्त्रदृष्टिसूत्रव्याख्यानान्तरे च दहराद्यहंग्रहोपासनासु जीवब्रह्माभेदगोचरत्वमपि स्पष्टतया प्रदर्शितम् । तच्च तत्स्थले श्रीकण्ठभाष्यतदीयशिवार्कमणिदीपिकाख्य-दीक्षितचरणकृतव्याख्यानदर्शिनां स्पष्टमिति न तद्विलिख्यते ।

अहंग्रहोपासनासु प्रतीयमानस्स चाभेदः—

'अद्वैतमागमशिरोभिरुपासनायामुक्तं तवेति परमार्थतया न वाच्यम् ।
भेदस्स्फुटो गरुडमान्त्रिकयोरलीकं तादात्म्यभावनमथापि विषं प्रमार्ष्टि ॥'

इति सुदर्शनाचार्यैः तात्पर्यसंग्रहे कथितरीत्या आरोपित इत्यपि वक्तुं शक्यते, तथापि जीवब्रह्माभेदस्यारोपितत्वाङ्गीकारेऽपि श्रीकण्ठाचार्यैरहंग्रहोपासनासु जीवब्रह्माभेदभानाङ्गीकारात् रामानुजमध्वाचार्याभ्यामभेदोपासनस्यापि अनङ्गी-कारात् श्रीकण्ठमतमाचार्यपादाभिमतजीवब्रह्माभेदतत्त्वज्ञानप्रतिपादकाद्वैतमताव्य-वहितपूर्वभूमिकारूपं, इतरत् व्यवहितपूर्वभूमिकारूपम्, इति प्रकृतविषयस्य न काप्यनुपपत्तिः ।

वस्तुतस्तु श्रीकण्ठाचार्यैः 'निवृत्तब्राह्मणादिदेहाभिमानमयपशुभावस्य निरतिशयस्वरूपानन्दसाक्षिस्वप्रकाशशिवरूपपराहंभावापत्तिः मुक्तिरिति सर्वश्रुतितात्पर्यात्' इत्यहंग्रहाधिकरणभाष्यवचनादिभिः निखिलभ्रान्त्यादिहेतुपुण्यपापक्षयपूर्वकं परमशिवलोके तत्सायुज्यं प्राप्तस्यापि मुक्तस्य बुद्धौ आरोपितार्थास्पर्शिन्यामुपासनाकालाभ्यस्ताभेदभावनाप्रकर्षजवासनादार्ढ्यप्रयुक्तशिवाहंभावविषयकत्वानुवृत्त्युक्त्या अर्थात् जीवब्रह्माभेदः पारमार्थिक इत्यपि सूच्यत इति अभेदोपासनस्येवाभेदतत्वज्ञानस्यापि भगवत्पादमत इव श्रीकण्ठमतेऽपि अङ्गीकाराविष्कारात् श्रीकण्ठमतमाचार्यपादमताव्यवहितपूर्वभूमिकारूपमिति सुदृढम् । एतच्च दीक्षितचरणैरेव शिवाद्वैतनिर्णये सवृत्तिकानन्दलहरीग्रन्थे च स्फुटं प्रतिपादितम् ।

अत्र च श्रीकण्ठभाष्ये प्रतिपादितमहङ्ग्रहोपासनानां शरीरशरीरिभावरूपस्वस्वामिभावविषयकत्वं जीवब्रह्माभेदविषयकत्वञ्चेति प्रकारद्वयं परस्परविरुद्धं यद्यपि, तथापि अधिकारिभेदेन तत्प्रदर्शितमिति न विरोधः इत्यपि दीक्षितचरणैरेवोक्तम् ।

तथा हि—'शुद्धब्रह्मावाप्तिरूपमहाफलश्रवणमात्रसंतुष्टः तत्प्राप्त्यर्थं तन्निदिध्यासनसाक्षात्कारजननसमर्थचित्तैकाग्र्यरहितः मन्दः तदुपयोगिनं सगुणोपासनमार्गमपहाय शुद्धब्रह्मविषयेषु श्रवणमनननिदिध्यासनेषु हठात् प्रवृत्तः तदुचितं चित्तैकाग्र्यमनधिगच्छन्नुभयभ्रष्टो माभूत्, दृढभक्तिपूर्वकचिरनिरन्तरोपासनाराधितस्यानन्तकल्याणगुणदिव्यविग्रहविशिष्टस्य सगुणेश्वरस्य प्रसादान्निर्गुणविषयकचित्तस्थैर्यं प्राप्नोत्विति तदनुजिघृक्षया तं निर्गुणविषयकप्रवृत्तेः प्रच्याव्य सगुणोपानास्वेव स्थिरया भक्त्या प्रवर्तयितुं निर्गुणनिगूहनेन वेदान्तानां सगुणे समन्वयप्रदर्शनपूर्वकं भगवत्पादप्रदर्शित एव सगुणब्रह्माभेदोपासनामार्गः यथा श्रीकण्ठाचार्यैः प्रदर्शितः भाष्ये, तथैव साक्षान्मोक्षोपयोगितत्वावबोधार्थे श्रवणमननपूर्वके निर्विशेषनिदिध्यासने वा, तदपेक्षितात्यर्थचित्तैकाग्र्यादिसंपादनद्वारा

तदुपयोगिनि दहरविद्यादिरूपे सविशेषब्रह्माभेदोपासने वा सामर्थ्यादिरूपस्य लौकिकस्य शास्त्रीयस्य वा अधिकारिविशेषणस्य वैकल्यात् अधिकारपौष्कल्यरहितान्प्रति प्रवर्तितः पुराणेतिहासागमप्रसिद्धः, तत्क्रतुन्यायेन स्थानविशेषगतभगवत्कैङ्कर्यप्राप्तिफलकः, स्थानविशेषप्राप्त्यनन्तरं तत्रैवाभेदोपासनादिद्वारा मोक्षफलकश्च योऽयं दासमार्गः तन्मार्गावलम्ब्यधिकारिविशेषान्प्रति शरीरशरीरिभावरूपस्वस्वामिभावोपासनामार्गोऽपि भाष्ये तैः प्रदर्शित इति न विरोधः' इति।

एवञ्च यथा भगवत्पादप्रदर्शितनिर्गुणज्ञानसगुणध्यानरूपमार्गद्वयमध्ये सगुणध्यानमार्गमेवाधिकारिविशेषानुगुणमधिकृत्य श्रीकण्ठमतं प्रवृत्तं, तथैव श्रीकण्ठाचार्यप्रदर्शिताभेदोपासनशरीरशरीरिभावात्मकस्वस्वामिभावोपासनरूपमार्गद्वयमध्येऽपि शरीरशरीरिभावरूपस्वस्वामिभावोपासनमार्गमेवाधिकारिविशेषानुगुणमधिकृत्य रामानुजमतं प्रवृत्तमिति बोध्यम्।

स्वस्वामिभावोपासनाहंग्रहोपासनातत्वज्ञानानाञ्च पूर्वपूर्वापेक्षया उत्तरोत्तरस्योत्तरोत्तरोत्कृष्टभूमिकात्वं तेषामुत्तरोत्तरोत्कृष्टफलकीर्तनेन सूचितं श्रीमद्भास्कररायैः शिवनामकल्पलतिकाख्यायां पद्यरूपायां शिवाष्टोत्तरव्याख्यायाम्—

'प्रतीकविदहंग्रहो भृतक इत्युपास्तेर्निजा-
द्विधेश्शिवसमीपताशिवतदात्मतासार्ष्टिताः।
भवन्ति ससलोकता अमृतताऽऽत्मविज्ञानतोऽ-
खिलं फलमतो भवेदिति मतोऽपवर्गप्रदः॥' इति।

अत्र श्लोके सार्ष्टिता समानधर्मिता सारूप्यमिति यावत्। निजविधिः स्वधर्मरूपं कर्म, भृतकः स्वस्वामिभावोपासकः इति चार्थः। तथा च कर्मणः सलोकता, प्रतीकोपासनस्य सामीप्यं, स्वस्वामिभावोपासनस्य सारूप्यं, अहंग्रहोपासनस्य सायुज्यं, तत्त्वज्ञानस्य कैवल्याख्यममृतत्वञ्च फलं क्रमेणोत्कृष्टमिह निर्दिष्टम्।

यत्तु वेङ्कटनाथेन 'सालोक्यसारूप्यादिशब्दवत् सायुज्यशब्दोऽपि युक्साम्यपरः, सर्वं हि भगवता मुक्तेन च भोग्यत्वेन युक्तम्। 'शरवत्तन्मयो भवे'दित्यादिषु उक्तसंयोगविशेषः सायुज्यशब्देन विवक्षित इत्यपि साधु' इति सायुज्यशब्दस्य तादात्म्यार्थातिरेकेण केवलभेदार्थकत्वमुक्तं, तत्तस्य स्वस्वामिभावरूपभेदोपासनामार्गावलम्बित्वात्तस्यैव सायुज्यफलकत्ववर्णनप्रत्याशया, तत्र च तत्क्रतुन्यायविरोधेन तादात्म्यफलवर्णनस्यायोगात्। अभेदोपासनारूपाहंग्रहोपासनानान्तु तत्क्रतुन्यायेन तादात्म्यरूपसायुज्यफलकत्ववर्णनमेवोचितम्, अत एव श्लोके सायुज्यशब्दस्थाने तदात्मतेति निर्दिष्टम्॥

(१३) भूमिकाक्रमे द्वितीयं कारणम्।

एवं मतचतुष्टयस्य क्रमनिर्देशप्रयोजकक्रमिकभूमिकाचतुष्टयरूपत्वे जीवब्रह्मणोः पृथक्सिद्धस्वस्वामिभावोपासनाऽपृथक्सिद्धस्वस्वामिभावोपासनाऽभेदोपासनाऽभेदतत्वज्ञानरूपोत्तरोत्तरोत्कृष्टमुक्तिसाधनपदार्थव्यवस्थापकत्वमेकं कारणमुक्तम्।

अथापरमपि कारणमुच्यते—

'भेदः प्रमान्तरैस्सिद्धः न त्वागमसमाश्रयात्।
पशवोऽपि हि जानन्ति भेदमक्षादिमानतः॥'

इति वार्तिकाद्युक्तरीत्या सर्वेषामपि जनानां स्वाभाविकाज्ञानिकसकलविधबन्धहेतुद्वैतप्रतीतिनिरासेन कथञ्चित् शास्त्राधेयवेदपरमतात्पर्यगोचरपरमानन्दाविर्भावरूपमुक्तिहेतुभूताद्वैतप्रतीत्युत्पादन एव सर्वेषामपि मतानां तात्पर्यमित्येतत् सर्वमतलक्ष्यैक्यमूलकाविरोधप्रतिपादकपूर्वोक्तबहुप्रमाणवचनसिद्धम्।

एवं सत्यपि अनादिनिरूढद्वैतवासनावासितान्तःकरणेषु अधिकारिषु सहसैव द्वैतप्रतीत्युपमर्देन परमपुरुषार्थहेतुभूताद्वैतप्रतीत्युत्पादनस्याशक्यतया, परश्शतवेदान्तवाक्येषु जीवजगद्ब्रह्मणामद्वैतप्रतिपादकेषु सत्स्वपि तेषां 'आदित्यो यूपः'

'यजमानः प्रस्तरः' इत्यादिवाक्यानामिव बाधितार्थकत्वभ्रमस्यैव जायमानत्वेन तस्यापि निराकरणायोगेन, यथाकथञ्चित्सन्मार्गे सर्वेषामपि बुद्धेस्संग्रहणीयत्वात्त-द्बुद्ध्यनुसारेणैव वेदान्तप्रतिपादितसन्मार्गप्रवेशहेतोस्सुगमस्य द्वैतबुद्ध्यविरोधिनः कस्यचिन्मतस्य प्रथममवश्यापेक्षितत्वेन, मध्वाचार्यप्रवर्तितस्य च द्वैतमतस्य जीव-जगद्ब्रह्मणां जीवानां जगताञ्च मिथो भेदमभ्युपगम्यैवाद्वैतवचनानामपि कथञ्चित् द्वैतार्थकत्वं परिकल्प्य मुक्तावपि लोकबुद्ध्यनुसारेण विषयभोगं तत्तारतम्यं आन-न्दानन्दिनोर्भेदं मुक्तियोग्यतमोयोग्यनित्यसंसारिरूपजीवत्रयं सर्वेषामपि जीवा-नामणुत्वं ब्रह्मणो जगन्निमित्तकारणमात्रत्वं नारायणाख्यस्य परब्रह्मणः पृथक्सिद्ध-स्वस्वामिभावोपासनेन जीवानां नानाविधस्वस्वयोग्यतानुसारेण मुक्तिलाभमन्यच्चै-तादृशविषयजातं बुद्धेः कथमपि क्लेशमजनयित्वैव बोधयतः तादृशत्वेन, तदेव मुक्तिसौधनिश्रेणिकाप्रथमपर्वत्वेन श्रीमद्दीक्षितचरणाः प्रथममरिच्छेदे प्रतिपाद-यामासुरिति युज्यते।

यथा कर्मवासनावासिताधिकार्यनुसारेण छान्दोग्योपनिषदि कर्माङ्गाव-बद्धोपासनेनोपक्रमः 'तत्र कर्माभ्यासस्य दृढीकृतत्वात्कर्मपरित्यागेनोपासने दुःखं चेतस्समर्पणं कर्तुमिति कर्माङ्गविषयमेव तावदादौ उपासनमुपन्यस्यते' इति छान्दोग्यभाष्यात्, यथा वा अध्ययनवासनावासिताधिकार्यनुसारेण तैत्तिरीयोपनिषदि संहितोपासनेनोपक्रमः, 'अथ—अध्ययनानन्तरं, अतः-यतोऽत्यर्थं ग्रन्थभाविता बुद्धिः न शक्यते सहसा अर्थज्ञानविषयेऽवतारयितुमित्यतः, संहिताया उपनिषदं—संहिता-विषयं दर्शनं ग्रन्थसन्निकृष्टामेव व्याख्यास्याम इत्यर्थः' इति तैत्तिरीयभाष्यात्, तथैव द्वैतवासनावासिताधिकार्यनुसारेण द्वैतमतेनोपक्रान्तं दीक्षितचरणैरिति सुष्ठु युज्यते। अधिकारी प्रथमतः लोकाद्व्यावृत्तस्सन् शास्त्रवश्यो भवतु, लौकिक-क्रियाकारकफलात्मकद्वैतपदार्थवासनां परित्यज्य शास्त्रीयक्रियाकारकफलात्मकद्वैत-पदार्थवासनावासितो भवतु, पश्चात् कथञ्चिदद्वैतवासनया तामप्यपाकरिष्याम इति तेषां निगूढोऽभिप्रायः। यद्यपि नैयायिकादिमतमपि द्वैतमतरूपमस्ति, तथापि

न तत्र भगवद्गुणानां भगवदुपासनानां च मध्वमतवदुपपादनमस्ति, इति तत्परित्यक्तं श्रीदीक्षितैरिति ज्ञेयम् ।

अथ प्रथमपर्वतया प्रदर्शितमध्वाचार्यप्रवर्तितद्वैतमतपरिचयवशेन लोकवासनाव्यावृत्तिपूर्वकं शास्त्रवश्यतामापन्नस्य द्वैतमतोक्तप्रकारेण भगवतः पृथक्सिद्धस्वस्वामिभावोपासनाधीनभगवदनुग्रहवशात् समुपजातचित्तशुद्धिविवेकादिसाधनस्याधिकारिपुरुषस्य शनैश्शनैरुन्निनीषया, द्वैतवासनाया अनुन्मूलनेनैव कथञ्चिदद्वैतवासनाया अपि किञ्चिदिव आधायकस्य कस्यचिन्मतस्यापेक्षितत्वेन, विष्णुविशिष्टाद्वैतमतस्य च रामानुजाचार्यप्रवर्तितस्य द्वैतवासनावासितपुरुषीयद्वैतप्रतीत्यनुपमर्देनैव जीवजगद्ब्रह्मणां जीवानां जगताञ्च मिथो भेदमभ्युपगम्यैव, परं तु पूर्वमतवत् जीवजगद्ब्रह्मणामद्वैतप्रतिपादकश्रुतिवचनानां कथंचित् द्वैतार्थकत्वकल्पनप्रयुक्तक्लेशं विहाय जीवजगद्रूपयोः चिदचितोः ब्रह्म प्रति शरीररूपविशेषणत्वं, ब्रह्मणश्च चिदचितौ प्रति शरीरित्वरूपविशेष्यत्वं, शरीरशरीरिभावनिबन्धनां जीवजगद्ब्रह्मणां त्रयाणां तत्वानामपृथक्सिद्धिञ्च व्यावर्ण्य चिदचिद्रूपशरीरात्मकविशेषणविशिष्टब्रह्मणः सकाशात् व्यतिरिक्तस्य ब्रह्म प्रति अविशेषणीभूतस्य अशरीरस्य पृथक्सिद्धस्य पदार्थस्य लोकेऽभावेन विशिष्टरूपेणाद्वैतमुपवर्ण्य, एतदर्थबोधकत्वमेवाद्वैतबोधकवचनानां परिकल्प्य, ब्रह्मणः केवलनिमित्तत्वनिराकरणपूर्वकमभिन्ननिमित्तोपादानत्वं प्रसाध्य, जीवाणुत्वं पूर्वमतोक्तमनपहायैव विषयभोगञ्च मुक्तौ स्वीकृत्यैव, परं तु मुक्तौ तारतम्यं निराकृत्य, नारायणाख्यब्रह्मणः स्वशरीरित्वरूपस्वशेषित्वेनापृथक्सिद्धस्वस्वामिभावोपासनां बोधयतः तादृशत्वेन, तदेव मुक्तिसौधनिश्श्रेणिकाद्वितीयपर्वत्वेन श्रीमद्दीक्षितचरणाः द्वितीयपरिच्छेदे प्रतिपादयामासुरिति युज्यते ।

विशिष्टाद्वैतमते हि जीवजगद्रूपयोः चिदचितोः ब्रह्मणश्च घटपटयोरिव न पृथग्भावरूपः अत्यन्तभेदः, तदनन्यत्वश्रुतिविरोधात् । नाप्यत्यन्तमभेदः, विरुद्धधर्मवत्त्वात्, नापि भेदाभेदः, भेदाभेदयोरेकत्र विरोधात् । किं तु गुण-

गुण्यादिन्यायेन लौकिकवैदिकसकलप्रमाणप्रसिद्धान्तर्गणिकभेदाप्रतिक्षेपकमपृथग्भावेनानन्यत्वमुच्यते। इदमेव चानन्यत्वं विशिष्टाद्वैतपदेनाभिलप्यते। यथा लोके शरीरस्य शरीरिणश्च भेदे सत्यपि, शरीरशरीरिणोः घटपटादिवत्पृथक्सिद्ध्यभावेन शरीरविशिष्टस्य शरीरिणः एक एवासौ देवदत्त इति अद्वैतं व्यवह्रियते, यथा वा नगरवृक्षादीनामन्तर्गतानां गृहप्रासादवीथीप्राकारगोपुरारामवापीकूपतटाकनद्यादीनां शाखापलाशकुसुमफलादीनाञ्च बहुविधपदार्थानां सत्त्वेपि, एकमेवेदं नगरं, एक एवायं वृक्षः, इत्येवमादिविशिष्टरूपेणैक्यं व्यवह्रियते, तद्वदेव ब्रह्मणोऽपि विशिष्टरूपेणैकत्वव्यवहारः।

विशिष्टाद्वैतसिद्ध्यर्थमेव तन्मते जीवजगत्साधारणशरीरत्वपरिष्कारप्रयासोऽपि। विशिष्टाद्वैतमते मायाया एव जगद्रूपपरिणामित्वेन विकारित्वेऽपि ब्रह्मणश्चाविकारित्वेऽपि च जगदाकारपरिणाम्यपृथक्सिद्धमायाशरीरकत्वेन ब्रह्मणः उपादानत्वव्यवहारः। ब्रह्मणः केवलनिमित्तकारणत्वाभ्युपगमे कुलालादितो घटादेः पृथग्भाव इव ब्रह्मणोऽपि सकाशाज्जगतः पृथग्भावस्स्यात्, अत उपादानत्वस्यापि वर्णनम्। तथा सति मृदादित इव घटादेः ब्रह्मणस्सकाशाज्जगतोऽपृथग्भावस्स्यात्। एवं जीवजगतोः ब्रह्मशरीरत्वानुपगमे पृथग्भावस्स्यात्, अतश्शरीरत्ववर्णनम्। तथा च विशिष्टाद्वैतमताश्रयणेन कथंचिदपृथग्भावेनानन्यत्वरूपस्याद्वैतस्य वासना जायेतेति तन्मतं द्वितीयपर्वत्वेन निवेशयतां दीक्षितचरणानामभिप्रायः।

किं च विशिष्टाद्वैतमते मध्वमतवत् मुक्तिदशायां जीवानां तारतम्यं नाङ्गीक्रियते, तदपि तन्मतस्य द्वितीयपर्वत्वाश्रयणे बीजम्। मध्वमत इव बन्धदशावत् मुक्तिदशायामपि जीवतारतम्याङ्गीकारे हि, मुक्तिकालीनस्य तारतम्यस्य पारमार्थिकत्वेनैव वक्तव्यत्वेन, परस्परविलक्षणत्वेन प्रमितानां अत एव बहूनां जीवानामेकेन ब्रह्मणा ऐक्यस्य संभावयितुमप्यशक्यत्वेन तृतीयतुरीयपर्वरूपमतयोरद्वैतं बोधयितुमशक्यं स्यात्। रामानुजमते मुक्तिकाले मुक्तितारतम्यखण्डन-

पूर्वकं मुक्तानां मिथः साम्यस्य व्यवस्थापनात्, समानाञ्च भेदप्रयोजकवैलक्षण्याभावेन ऐक्यमपि बोधयित्वा ब्रह्मणा साकमभेदः उत्तरपर्वणोर्बोधयितुं सुकरस्स्यादिति दीक्षितचरणानामाशय उन्नीयते। एवञ्च मध्वमतविलक्षणं रामानुजमतोक्तं ब्रह्मोपादानत्वं शरीरशरीरिभावनिबन्धनापृथक्सिद्धिमूलकविशिष्टाद्वैतं मुक्तितारतम्यभङ्ग इति त्रयमेवाद्वैतवासनाधायकं तन्मतस्य द्वितीयपर्वत्वगमकं बोध्यम्।

यद्यपि रामानुजमते जीवब्रह्मणोर्भेदसाधकं परममुक्तिदशायामपि स्वामित्वकिङ्करत्वमूलकं, जगत्कारणत्वतदभावमूलकं, अणुत्वविभुत्वरूपधर्मभेदमूलकञ्च वैलक्षण्यं, अणोरपि जीवस्य संकोचविकासशालिधर्मभूतज्ञानप्रसरेण कृत्स्नशरीरव्यापिसुखाद्यनुभवोपपादनं, निर्विशेषाद्वैतब्रह्मसिद्ध्युपयोगिभूतस्य वैशिष्ट्यानवगाहिनः निर्विकल्पकज्ञानस्य खण्डनपूर्वकं गुणसंस्थानादिविशिष्टविषयकप्रथमपिण्डज्ञानस्य निर्विकल्पकत्वव्यवस्थापनं, प्रपञ्चमिथ्यात्वेनाद्वैतसिद्ध्युपयोगिनः दृष्टान्तरूपस्य स्वाप्नपदार्थशुक्तिरजतादिमिथ्यात्वस्य खण्डनपूर्वकं सत्ख्यातिवादाङ्गीकारः, इत्यादिप्रमेयजातं द्वैतवासनाधायकमपि निरूपितमस्ति, तथापि बलवद्द्वैतवासनावासितस्य सहसा अद्वैतबुद्ध्युत्पादासंभवात् उत्तरोत्तरपर्वारोहणेन क्रमेण पूर्णाद्वैतवासनासिद्धिर्भविष्यति, इदानीं प्रपञ्चसत्यत्ववासना जीवब्रह्मभेदवासना सर्वपदार्थसविशेषत्ववासना चास्तु, तावतापि न क्षतिः। 'अर्धं तावदपनीतं भारस्य' इति न्यायेन कियती द्वैतवासना नष्टा, पूर्वोक्तरीत्या विशिष्टरूपेणापि कियती अद्वैतवासना जाता, तावता अलमिति तात्पर्येणैव रामानुजमतं द्वितीयपर्वत्वेन निवेशितमिति न विरोध इत्यवगन्तव्यम्।

अथ द्वितीयपर्वतया प्रदर्शितरामानुजाचार्यप्रवर्तितविशिष्टाद्वैतमतपरिचयवशेन तन्मतोक्तप्रकारेण भगवतः अपृथक्सिद्धस्वस्वामिभावोपासनाधीनभगवदनुग्रहवशात् द्वैतवासनायाः किञ्चिदिव ह्रासं अद्वैतवासनायाः किञ्चिदिव प्रादुर्भावञ्चाधिगतवतः अधिकारिपुरुषस्य ततोऽपि किञ्चिदुन्निनीषया द्वैतवासनायास्सर्वथा अनुन्मूलनेऽपि पूर्वमतादप्यधिकतया अद्वैतवासनाधायकस्य कस्यचि-

न्मतस्यापेक्षितत्वेन, श्रीकण्ठाचार्यप्रवर्तितस्य शक्तिविशिष्टशिवाद्वैतमतस्य च रामानुजमतवदेव प्रायशः प्रक्रियाङ्गीकारेऽपि, पूर्वं रामानुजमतश्रीकण्ठमतयोर्महतो विशेषस्य निरूपणप्रकरणोक्तप्रकारेण चिदचिद्रूपप्रपञ्चात्मना परिणामिन्याः चिच्छक्तेः चिदचिद्रूपप्रपञ्चाभेदं, तस्या एव ब्रह्माभिन्नत्वं, तदीयसकलगुणगणरूपत्वं, अथापि ब्रह्मणो निर्विकारत्वं, जीवसंबन्धिघटस्फुरणस्य ब्रह्मस्फुरणरूपत्वं, अहं सुखीति जीवानुभूयमानसुखस्य ब्रह्मानन्दांशत्वं, ब्रह्मज्ञानिनः अर्चिरादिगत्यभावेन इहैव मुक्तिप्रतिपादकमतनिर्दुष्टत्वं, अहंग्रहोपासनेषु जीवब्रह्माभेदभानं, मुक्तिदशायामपि जीवब्रह्माभेदभानञ्च व्यवस्थापयतः, 'आचार्याणान्तु स्वप्नव्यवहारः मनोराज्यादिव्यवहार इव न जीवसङ्कल्पकृतः, किं तु परमेश्वरसङ्कल्पमात्राधीनः इत्येतावन्मात्रेऽभिनिवेशः, तस्यैव सूत्रार्थत्वात्, न तु स्वप्नसत्यत्वमिथ्यात्वादिपक्षेषु, अतोऽत्र पक्षविशेषो न चिन्तितः' इति शिवार्कमणिदीपिकायां दीक्षितेन्द्रोक्तरीत्या स्वप्नसत्यत्वपक्षाग्रहशून्यस्य तादृशत्वेन, तदेव मुक्तिसौधनिश्रेणिकातृतीयपर्वत्वेन श्रीमद्दीक्षितचरणाः तृतीयपरिच्छेदे प्रतिपादयामासुरिति युज्यते।

श्रीकण्ठमतस्य मतान्तरापेक्षया अद्वैतमतप्रत्यासत्त्यतिशयश्च पूर्वमेव स्फुटं वर्णितः। भगवत्पादमतस्य श्रीकण्ठमतस्य च प्रत्यासत्त्यतिशयसद्भावादेव श्रीभागवतव्याख्यातृश्रीनीलकण्ठयतीन्द्रप्रणीते यतिधर्मप्रबोधे 'सूत्रार्थावगतिमतिगंभीरामधिगन्तुं विद्वज्जनमनोहरं श्रीशंकरभगवत्पादीयं, उत अखिलचेतनसमुपासनानुगुणसमुदितनिजप्रसादसमर्पितपुरुषार्थसार्थनिष्कलसकलब्रह्मप्रतिपादकमुपनिषच्छास्त्ररहस्यविशदीकरणबद्धकङ्कणश्रीकण्ठशिवाचार्यविरचितं वा महाभाष्यं गुरुमुखेन परिशीलयन्' इत्यादिग्रन्थेन संन्यासिनः भगवत्पादभाष्यं अथ वा श्रीकण्ठभाष्यं परिशीलनीयत्वेनोक्तं, न तु भाष्यान्तरमित्यपि वेदितव्यम्।

अथ तृतीयपर्वतया प्रदर्शितश्रीकण्ठाचार्यप्रवर्तितशक्तिविशिष्टशिवाद्वैतमतपरिचयवशेन तन्मतोक्तप्रकारेण शक्तिविशिष्टशिवाभेदगोचराहंग्रहोपासनाऽऽवर्जितभगवदनुग्रहेण,

"तथाप्यनुग्रहादेव तरुणेन्दुशिखामणेः ।
अद्वैतवासना पुंसामाविर्भवति नान्यथा ॥
अनुग्रहश्च देवस्य शक्त्या चिद्रूपया सह ।
यथावत्त्वं परिज्ञाय ध्यायद्भिस्समवाप्यते ॥'

इति शिवार्कमणिदीपिकायां दीक्षितचरणैरेवोक्तरीत्या समासादितपूर्णाद्वैतवासनस्य अधिकारिपुरुषस्य साधनचतुष्टयसंपन्नस्य कैवल्यशब्दिते परिपूर्णस्वाराज्येऽभिषेचनाय

'नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्मचैतन्यमेकं
धर्मो धर्मीति रूपद्वयमयति पृथग्भूय मायावशेन ।
धर्मस्तत्रानुभूतिस्सकलविषयिणी सर्वकार्यानुकूला
शक्तिश्चेच्छादिरूपा भवति गुणगणश्चाश्रयस्यैक एव ॥'

इति रत्नत्रयपरीक्षायां दीक्षितचरणोक्तरीत्या श्रीकण्ठभाष्योक्तचिच्छक्तिशिवात्मकधर्मधर्मिरूपमायिकरूपद्वयकल्पनाधिष्ठानभूतशुद्धचित्प्रकाशकं मुक्तिसौधनिश्रेणिकाचरमपर्वात्मकं भगवत्पादोद्घाटितं ब्रह्मसूत्रकृतां परमतात्पर्यगोचरं शुद्धाद्वैतमतं तुरीयपदप्रापकं तुरीयभूमिकारूपं तुरीयपरिच्छेदे श्रीमद्दीक्षितचरणाः प्रत्यपादयन्निति सुतरां शोभते ।

एतावता च ग्रन्थेन अद्वैतमुक्तिसौधपथे उन्निनीषितानामधिकारिणां द्वैतवासनावासितानामाशयानुसारेण शनैश्शनैरुन्नयनसाधनप्रक्रियाविशेषशालित्वेन मध्वरामानुजश्रीकण्ठभगवत्पादमतानां क्रमसन्निवेश इति द्वितीयमपि कारणमुक्तं भवति । अधिकारिबुद्धयनुसारिक्रमेण मतानां निरूपणञ्च ब्रह्ममीमांसासूत्र एव दृश्यते । तथाहि—तत्र द्वितीयाध्यायप्रथमपादे प्रत्यक्षादिप्रामाण्याभिनिवेशिनां सहसा शुद्धाद्वैतबोधासंभवमभिप्रेत्य, अत्यन्तभेदाश्रयणेन वेदार्थद्वैतनिर्णयानुपयोगिनं लोकव्यवहारमात्रोपयुक्तं आरंभसंघातवादद्वयं निरस्य, अभेदांशेन वेदार्थभूताद्वैतसमर्थने उपकुर्वाणं भेदांशेन प्रत्यक्षादिकमप्यनुसरन्तं कर्मोपासना-

काण्डाधिकार्यनुकूलं परिणामवादं विवर्तवादप्रत्यासन्नं प्रत्यक्षादिप्रामाण्याश्रयणेऽपि नाद्वैतसमन्वये कश्चन विरोधोऽस्तीति दर्शयितुं प्रथमतः 'भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्' इति सूत्रेण प्रदर्श्य, भेदाभेदाश्रयणेनात्यन्तभेदाद्विमुखचित्तस्य पुरुषस्यानन्तरं भेदांशनिराकरणेन केवलाभेदो बोधयितुं शक्यत इति भावेन पश्चात् 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इत्यादिसूत्रेण श्रुतिपरमतात्पर्यगोचर-केवलाभेदपर्यवसायी ज्ञानकाण्डाधिकार्यनुकूलः विवर्तवादः प्रदर्शितः। तदुक्तं संक्षेपशारीरके—

'आरंभसंहतिविकारविवर्तवादानाश्रित्य वादिजनता खलु वावदीति।
आरंभसंहतिमते परिहृत्य वादौ द्वावत्र संग्रहपदं नयते मुनीन्द्रः ॥' इति।

अत्र भोक्त्रापत्तिसूत्रे तदनन्यत्वसूत्रे च क्रमेणेत्यर्थः।

'आरुह्य भूमिमधरामितराधिरोढुं शक्येति शास्त्रमपि कारणकार्यभावम्।
उक्त्वा पुरा परिणतिप्रतिपादनेन संप्रत्यपोहति विकारमृषात्वसिद्ध्यै ॥'

इति च।

विवर्तवादस्य परिणामवादः पूर्वभूमिः। ब्रह्मणोऽन्यथाभावस्य सत्यत्वे परिणामवादः, मिथ्यात्वे विवर्तवाद इत्येतावानेव विवर्तपरिणामवादयोर्विशेषः। सत्यत्वबुद्ध्यनुपमर्देनैव कर्मोपासनकाण्डयोः प्रवृत्तिः। सत्यत्वबुद्ध्युपमर्देन ज्ञान-काण्डप्रवृत्तिः। अतः परिणामवादस्य प्राथम्यं विवर्तवादस्य च पश्चात्त्वं इत्यादि च संक्षेपशारीरकादावेव स्पष्टम्।

दीक्षितेन्द्राणामेतादृशमतचतुष्टयक्रमलेखप्रयोजकाभिप्रायविशेषश्च, चतुर्मत-सारसंग्रहोपक्रमे ब्रह्मसूत्रात्मकपारिजातवृक्षस्य विविधशाखायितमध्वादिनाना-भाष्योदितलोकान्तरारोहणलभ्यनानारसाढ्यफलवितत्यपेक्षया मूलस्तंभायितभगव-त्पादभाष्योदितस्य अनारुह्य इहैव लभ्यस्य महाफलस्याधिकतरस्वादुत्वोक्त्या, भगवत्पादमतसंग्रहरूपनयमंजरीनामकतुरीयपरिच्छेदोपक्रमे मध्वादिनानाभाष्या-हृततत्तत्सगुणफलततेः भगवत्पादभाष्याहृतातिमहाफलविशेषरूपानन्दसिन्धवं-

शभावापन्नतत्तत्सरिद्रूपत्वकीर्तनेन, उपनिषद्देव्याः कण्ठाभरणत्वेन शोभावहत्वम-भिप्रेत्य न्यायमुक्तावली नयमयूखमलिका नयमणिमाला इति क्रमेण मध्वरामानुज-श्रीकण्ठमतसंग्राहकपरिच्छेदत्रयस्य मालिकात्वरूपणेन नामनिर्देशकरणेन, भगव-त्पादमतसंग्राहकान्तिमपरिच्छेदस्य नयमञ्जरीति पूर्वतननामत्रयवैजात्येन मञ्जरी-त्वरूपणेन नामनिर्देशकरणेन च, भगवत्पादमतं उपनिषद्देव्याः कर्णाभरणशिरो-भूषारूपत्वेनातिशयितशोभावहं, न केवलं मणिमुक्तादिग्रथितमालावत् दृष्टिमात्रा-कर्षकसौन्दर्यमात्रशालि, अपि तु सहृदयहृदयमधुपावलीसमाकर्षकगुणगणपरि-मलातिशयोपेतं सहृदयहृदयमधुपकुलसमास्वाद्यब्रह्मानन्दमधुरसमधुरं, अक्लेशेनाति-कठिनविषयाववोधकमृदुलपदसन्निवेशशालिभगवत्पादीयभाष्यादिग्रन्थमण्डिततया नितान्तमार्दवोपेतमपीति भगवत्पादमते तेषामतिशयितादरविशेषावगमात् तदीया-त्युत्तमशिवाद्वैतनिर्णयानन्दलहरीमुखग्रन्थपरिशीलनाच्च स्फुटमवगम्यत इति नात्र विषये विमतिलेशस्याप्यवसरः ।

चतुर्मतसारसंग्रहोपक्रमे विद्यमानश्च श्लोकोऽयम्—

यन्नानाभाष्यशाखोदितफलविततिः प्रौढनानारसाढ्या
　यस्मिन्मूले निरूढं फलमधिकतरं स्वाद्वनारुह्य लभ्यम् ।
यस्य प्रेक्षैव देहद्वयतदनुगतप्रत्यगर्थौ विविङ्क्ते
　सूत्रात्मा पारिजातस्सकलमभिमतं मह्यमर्थं स दद्यात् ॥ इति ।

नयमंजरीग्रन्थोपक्रमस्थश्लोकोऽयम्—

नानाभाष्यादृता सा सगुणफलततिर्वैधविद्याविशेषै-
　स्तत्तद्देशातिरम्या सरिदिव सकला यत्र यात्यंशभूयम् (भावम्) ।
तस्मिन्नानन्दसिन्धावतिमहति फले भावविश्रान्तिमुद्रा
　शास्त्रस्योद्घाटिता यैः प्रणमत हृदि तान्नित्यमाचार्यपादान् ॥ इति ।

परिच्छेदचतुष्टयस्यापि नामनिर्देशकश्लोका इमे—

आदावानन्दतीर्थीयामनुसृत्य मतस्थितिम् ।
न्यायमुक्तावली रम्या विशदार्था विरच्यते ॥
श्रेयसां निधिमिव श्रियःपतिं प्रेप्सतां प्रियहिताध्वदर्शिनी ।
लक्ष्मणार्यहृदयानुसारिणी तन्यते नयमयूखमालिका ॥
सोपानपंक्तिकल्पा सोमाभरणपदमारुरुक्षूणाम् ।
क्रियते नयमणिमाला श्रीकण्ठाचार्यदृष्टमार्गेण ॥
आचार्यपाददर्शितमाशयमनुसृत्य सूत्रकृतः ।
अधिकरणमञ्जरीमहमारचयाम्यात्मबोधाय ॥ इति ।

अत्र श्लोकचतुष्टये, आनन्दतीर्थीयां मतस्थितिं अनुसृत्य, लक्ष्मणार्यहृदयानुसारिणी, श्रीकण्ठाचार्यदृष्टमार्गेण इति मतत्रयस्य, आचार्यपाददर्शितं सूत्रकृतः आशयमनुसृत्य, इति भगवत्पादमतस्य च निर्देशप्रकारवैजात्येन अद्वैतमतमेव सूत्रकृदाशयानुसारि इति व्यंजयन्ति दीक्षितचरणाः । एवं श्रियःपतिं प्रेप्सतां प्रियहिताध्वदर्शिनी, सोमाभरणपदमारुरुक्षूणां सोपानपंक्तिकल्पा, इति मतान्तरं, आत्मबोधाय आरचयामि इति भगवत्पादमतं च निर्दिशन्तो दीक्षितचरणाः मतान्तराणि उपासनप्रतिपादकत्वेन क्रममुक्तिफलप्रदानि भगवत्पादमतं आत्मज्ञानप्रतिपादकत्वेन सद्योमुक्तिप्रदमिति विशेषं व्यञ्जयन्ति इति सहृदयैरवगन्तव्यम् ।

शुद्धाद्वैतावस्थारूपपरममोक्षप्रापकतत्त्वज्ञानस्य द्वैतावस्थाभेदरूपबन्धप्रापकं कर्म बहिरङ्गसाधनत्वेन, भगवत्पादभाष्ये बहुषु स्थलेषु द्वैतैकत्वशब्देन व्यवहृतं, विशिष्टाद्वैतपदेनेतरैः स्वभाष्ये व्यवहृतं, व्यष्टिविवक्षायां द्वैतरूपं, समष्टिविवक्षायामेकत्वरूपं, समष्टिव्यष्ट्यात्मकं, द्वैतैकत्वात्मकहिरण्यगर्भपदमपरमोक्षरूपं, फलत्वेन स्वीकुर्वत् उपासनमन्तरङ्गसाधनत्वेन च, व्यवहरतां भगवत्पादानामपि द्वैतद्वैतैकत्वाद्वैतबोधकमतानां क्रमिकोत्तरोत्तरभूमिकारूपत्वमभिमतमेवेति स्फुटं प्रतीयते इत्यपि बोध्यम् ।

(१४) भूमिकाक्रमे तृतीयं कारणम् ।

एवं मध्वादिमतचतुष्टयस्य क्रमनिर्देशे कारणद्वयमुक्तम् । तृतीयमपि कारणमन्यत् प्रसिद्धमस्ति । तदुच्यते—भगवत्पादादयो हि क्रमश आविर्भवन्तः स्वस्वकालभाविनां, उत्तमोत्तम-उत्तम-मध्यम-मन्दाधिकारिणां समुद्दिधीर्षया स्वस्वकाले तत्तदधिकारिमतिविभवानुसारेण सुग्रहाणि अद्वैतादिमतानि क्रमशः प्रकटयामासुः । तं क्रममनुरुन्धानाः श्रीदीक्षितचरणा अपि चतुर्मतसारसंग्रहा-ख्यस्वीयनिबन्धे विपरीतक्रमेण मध्वादिमतानि लिलिखुरिति श्लिष्यते । रामा-नुजाचार्याणां समयात् पूर्वतनः श्रीकण्ठाचार्यसमय इति अस्माभिः द्रविडात्रेय-दर्शनाभिधे निबन्धे सप्रमाणमुपवर्णितम् । तत्तत एवानुसन्धेयम् ।

मैसूर् नगरे विश्वविद्यालये मुद्रिते, नीलकण्ठशिवाचार्येण वीरशैवा-गमानुसारिणा पञ्चशतवत्सरेभ्यः प्राचीनेन प्रणीते, क्रियासाराभिधे शैवा-गमानुसारिक्रियाकलापबोधके ब्रह्मसूत्रतात्पर्यप्रकाशके च ग्रन्थे, विद्यमानाः श्लोका इमे—

'समुपेत्य तदा व्यासः प्रार्थयामास शङ्करम् ।
मतानि विविधान्येव समुत्पन्नानि शङ्कर ॥

मत्कृतानां च सूत्राणामन्यथा नयनं कृतम् ।
त्वत्प्रसादैकलब्धस्य सूत्रजालस्य शङ्कर ॥

यथापूर्वं त्वया कार्यं मत्सूत्रार्थे (तत्वार्थस्य) विवेचनम् ।
इति तेन प्रार्थितस्सन् दयालुः पार्वतीपतिः ॥

नीलकण्ठशिवाचार्यनाम्ना भाष्यमचीकरत् ।
विशिष्टाद्वैतसिद्धान्तप्रतिपादकमुत्तमम् ॥

मयापि तस्य तात्पर्यं श्रोतॄणां सुखबुद्धये ।
कारिकारूपतस्सर्वं क्रमेणैव निबध्यते ॥' इति,
'तल्लिङ्गमेव सूत्रेण व्यासेनापि विचारितम् ।
नीलकण्ठशिवाचार्यैः तत्तात्पर्यं प्रकाशितम् ॥' इति,
नीलकण्ठशिवाचार्यभाष्यार्थमनुसन्दधत् ।
वीरशैवैरभिमतमभिधास्ये श्रुतेर्मतम् ॥' इति च ।

तत्र च कीर्तितः ब्रह्मसूत्रभाष्यकारः नीलकण्ठशिवाचार्यः श्रीकण्ठाचार्य एव । तस्य नीलकण्ठाचार्य इत्यपि अपरं नाम उमापतिशिवाचार्येण पौष्करागमवृत्तौ व्यवहृतम् । यद्यपि श्रीकण्ठाचार्यः न वीरशैवागमानुसारी, तथापि ब्रह्मसूत्रतात्पर्यं तदुक्तं शिवपरत्वव्यवस्थापकं अविरोधात् वीरशैवागमानुसारिणा क्रियासारप्रणेत्रापि अनुसृतम् । स च क्रियासारे 'प्राचीनो भाष्यसन्दर्भः ' इति श्रीकण्ठाचार्यभाष्यं प्राचीनत्वेन व्यवहरति । क्रियासारग्रन्थश्च अप्पय्यदीक्षितकृतशिवतत्वविवेके, वैद्यनाथदीक्षितीये स्मृतिमुक्ताफले च, अनुदितपुरुषार्थप्रबोधकारैः ब्रह्मानन्दभारतीभिरप्यनूदितः, तस्मात् प्राचीनेन क्रियासारकृता प्राचीनत्वेन व्यवहृताः श्रीकण्ठाचार्याः परमप्राचीना इत्यत्र नास्ति संदेहलेशोऽपि । शिवपरब्रह्मसूत्रभाष्यकारः श्रीकण्ठशिवाचार्यातिरिक्तः कश्चित् नीलकण्ठशिवाचार्य इत्यत्र प्रमाणं नास्ति ।

किं च प्राचीनेन हरदत्तशिवाचार्येण प्रणीते पशुपतेस्सर्वदेवप्रकृष्टत्वविषये चतुर्विंशतिहेतुप्रतिपादके पञ्चरत्ने 'अप्राधान्याद्विशिष्टाद्वयसमधिगमे दानवानामरातेः.... पशुपतिस्सर्वदेवप्रकृष्टः ' इति श्लोके श्रीकण्ठशिवाचार्यप्रणीतभाष्ये प्रतिपादितं नारायणस्य शिवशक्त्यंशत्वं अभिप्रेत्य, शक्तिविशिष्टशिवस्य प्राधान्यं तदीयशक्त्यंशभूतनारायणस्याप्राधान्यं च व्यवहृतम् । विशिष्टाद्वयसमधिगमे इति पदेन श्रीकण्ठाचार्यप्रणीतं विशिष्टाद्वैतप्रतिपादकं ब्रह्मसूत्रभाष्यमभिप्रेतम् । तथा च श्रीकण्ठाचार्याः रामानुजादिभ्यः प्राचीना इति निश्चप्रचम् ।

(१५) मतचतुष्टयावलंबिनां मिथस्सामरस्यबुद्धिप्रार्थनया ग्रन्थोपसंहारः ॥

एवं तुरीयं मध्वादिमतचतुष्टयस्य मुक्तिहेतुक्रमिकभूमिकाचतुष्टयरूपत्वं तदीयक्रमपाठसूचितमुपपादितम् । तथा च दीक्षितेन्द्रैः चतुर्मतसारसंग्रहग्रन्थ-संगृहीते उपासनामार्गविशेषरूपे मध्वरामानुजश्रीकण्ठमतत्रये, वस्तुतश्शुद्धस्य निर्गुणस्य एकरूपस्यापि परब्रह्मणः मायोपाधिकत्वेन सगुणस्य नानाप्रकारेणोपा-सनासंभवात्, दहरशाण्डिल्यादिविभिन्नगुणकोपासनाभेदवत्, दीक्षितचरणैरेव 'उद्घाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः । यः प्रस्फुरत्यविरतं परिपूर्णरूपः' इति पद्ये योगिभिः रेचकप्राणायामाभ्यासपाटवेन विकासिते हृदयकमले नीवारशूकाङ्गुष्ठप्रादेशादिपरिमाणानां मध्ये स्वस्वरुच्यनु-सारिणा परिमाणेनाभिध्यातोऽपि भगवान् नित्यं गगनवद्व्यापकेन परिपूर्णरूपेण तेषां प्रकाशते इत्युक्तौपाधिकस्वाभाविकाविरुद्धपरिच्छेदापरिच्छेदगोचरतत्तत्परि-माणविशिष्टभगवद्ध्यानापरिच्छिन्नभगवत्स्फुरणवच्च, परस्परं ज्ञानमार्गेण चाविरुद्धे, तथा ज्ञानमार्गरूपे—

'स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढम् ।
परस्परं विरुध्यन्ते तैरयं न विरुध्यते ॥'

इति श्रीगौडपाददिव्यसूक्तिप्रतिपादितरीत्या सर्वाविरुद्धे भगवत्पादमते च, 'सर्वेषामपि पूजनी सुमनसां एषा मत्कृति'रिति चतुर्मतसारसंग्रहोपक्रमे कीर्तनेन मतचतुष्टयावलंबिषु सर्वेष्वपि विद्वत्सु सामरस्यमावहद्भिः,

'विधाय वेदान्विविधाः कलाश्च भावज्ञमप्राप्य विषीदतोऽन्तः ।
शंभोः प्रियं कर्तुमिवावतीर्णः श्रीमान् जयत्यप्पयदीक्षितेन्द्रः ॥'

इति श्रीनीलकण्ठदीक्षितोक्तरीत्या सकलवेदकलाभावज्ञैः, दीक्षितेन्द्रैरेव

'शिवं विष्णुं वा यद्यभिदधति शास्त्रस्य विषयं
तदिष्टं ग्राह्यन्नस्सगुणमपि तद्ब्रह्म भजताम् ।

विरोधो नातीव स्फुरति नहिनिन्दानयविदां
न सूत्राणामर्थान्तरमपि भवद्धार्यमुचितम् ॥'

इति प्रदर्शितसामरस्यमार्गेण सामरस्यबुद्धिं प्राप्य,

'अन्तश्छिद्राणि भूयांसि कण्टका बहवो बहिः ।
कथं कमलनाळस्य माभूवन्भंगुरा गुणाः ॥'

इत्युक्तरीत्या नास्तिकमतरूपबहुविधकण्टकैर्बहिर्व्याप्तस्य कमलनाळरूपस्य वैदिकमतस्य स्वभावसिद्धात्युत्तमगुणविशेषरूपतन्तूनां, वैदिकमतावान्तरमतविशेषाणां मिथस्सौभ्रात्राहर्णां अन्योत्पादितसामरस्याभावभ्रान्तिप्रभवकलहरूपान्तश्छिद्रैर्यथा भंगुरत्वं न भवेत्, तथा वेदाधिष्ठातृपुरुष एवानुकूल्यं संपाद्यानुगृह्णात्वस्मान् सर्वानपि वैदिकमहाजनानिति,

'शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते ।
तदप्यधिष्ठितं सर्वमेकेन परमात्मना ॥'

इति पूर्वमीमांसावार्तिकावगतवेदाख्यशब्दब्रह्माधिष्ठातृभावं, मध्वमतावलंबिभिः 'नमो ब्रह्मणे नमस्ते वायो' इत्यादिश्रुतिप्रतिपादितवाय्वात्मकब्रह्मरूपेण, रामानुजमतावलंबिभिः विष्णुरूपेण, श्रीकण्ठमतावलंबिभिः महेश्वररूपेण, भगवत्पादमतावलंबिभिः परब्रह्मरूपेण चोपास्यमानं, सर्वलोकगुरुरूपम्,

'गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥'

इति अतिप्राचीनश्लोके पूर्वोक्तमध्वादिमतचतुष्टयक्रमनिर्देशप्रयोजकयुक्त्युपोद्बलकेन ब्रह्मा विष्णुः महेश्वरः परं ब्रह्म इत्येवं मध्वरामानुजश्रीकण्ठभगवत्पादानुसन्धेयदेवतानामनिर्देशक्रमेण प्राचीनैरनुसंहितं परं ब्रह्म संप्रार्थ्योपसंहरामि लघुनिबन्धमिमम् ।

'एतद्ब्रह्मकल्पानन्तरं एष्यत्कल्पे वायोः ब्रह्मपदप्राप्तिः भारती वायुपत्नी सरस्वती भविष्यति' इति, 'भारतीमुख्यवाय्वोः ब्रह्माणीब्रह्मजन्मनि मुक्तिः' इति,

'नियमाद्वायुरेवैको ब्रह्मत्वं याति नापरः ।
तस्मात् समानता मुक्तौ वायुत्वे किंचिदूनता ॥'
'एको ब्रह्मा च वायुश्च न कश्चिद्वायुना समः ।'
'वायुर्हि ब्रह्मतामेति तस्मात् ब्रह्मैव स स्मृतः ॥'
'गुरुर्ब्रह्माऽस्य जगतो दैवं विष्णुस्सनातनः ।'
'द्वात्रिंशल्लक्षणवत्त्वात् ब्रह्मा उत्तमोत्तमगुरुः'
'द्वात्रिंशल्लक्षणैस्सम्यग्युक्ता वायुत्वयोग्यकाः ।
गुरुलक्षणसंपूर्णस्साक्षादेकश्चतुर्मुखः ॥'

इति चैवमादिमध्वमतग्रन्थपरिशीलकानां 'गुरुर्ब्रह्मा' इति प्राचीनश्लोकप्रथमवाक्ये मध्वमतोपास्यभविष्यद्ब्रह्मवायुदेवप्रत्यभिज्ञा भविष्यतीत्यत्र न विशयलेशोऽपि । इति शम् ।

मूर्तित्रयं च तुर्यं ध्यायन् द्वैतादिमतचतुष्कस्य ।
व्यलिखत् समरसभावं श्रीरामः पोलकाग्रहारजनुः ॥
मध्वमुनिलक्ष्मणार्यौ श्रीकण्ठाचार्यमपि जगत्पूज्यान् ।
भगवत्पादाचार्यान् चतुर्मताचार्यपूरुषान् वन्दे ॥
गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥
श्रीकाञ्चिकामकोटीपीठाधीश्वरजगद्गुरोः कृपया ।
समरसभावोऽन्योन्यं चतुर्मतानां प्रकाशितोऽद्य मया ॥

॥ पोलकं शास्त्ररत्नाकर श्रीरामशास्त्रिप्रणीतं चतुर्मतसामरस्यं समाप्तम् ॥

ओं तत् सत् ॥

प्राप्तिस्थानम् :—

(1) कामकोटि कोशस्थानम्
फरान्सिस् जोसफ् स्ट्रीट्, मद्रास् ।

(2) ग्रन्थकर्ता: मद्रास् संस्कृतकालेज्
मैलाप्पूर् ।

Copies can be had of :

1. **Sri Kamakoti Koşasthanan**
   Francis Joseph Street, Madras-1.

2. The Author, **Madras Sanskrit College,**
   Mylapore, Madras, 4.

भारती विजयम प्रेस्, तिरुवल्लिकेणि, मद्रास्—५.